
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

d 2012

दाखल क्र. M2015 विषय वैदिक कर्मकांड

नांव दर्शपूर्णमासइष्टी

लेखक / लिपीकार —

पृष्ठ 80 काळ — पूर्ण / ~~अपूर्ण~~

॥ अथ दर्शपौर्णमास इष्टिप्रारंभः ॥

॥१॥ श्रीगणेशाय नमः ॥ अथातो दर्शपूर्णमासौ व्याख्यास्यामः प्रातरग्निहोत्रं हुत्वा दर्भेष्वा
सीनो दर्भान्धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य देशकालौ संकीर्त्य ॥ दर्शेन य
क्ष्ये पौर्णमासेन यक्ष्ये इति संकल्प्य ॥ ततो वपनं ॥ त्रिषु दन्तीति बिभ्रमे पाक्यानमृतात्सत्यमु
पैमि ॥ यक्ष्यमाणो उप पुरस्पृन्य ॥ अस्मिन्दर्शपौर्णमासेष्ट्यां अध्वर्युं त्वामहं वृणे ॥ यतोस्मि
कर्म करिष्यामीत्युक्त्वा ॥ एवं ब्रह्मादीन्वृणोति ॥ गार्हपत्यादाहवनीयार्थमग्निमुद्धृत्य ॥ तूष्णीं
दक्षिणाग्निं प्रणीयाहवनीयं प्रणयति ॥ विहारस्यान्तरत उपविश्य ॥ अध्वर्युः ॥ देवागातु
विदो गातुमस्मार्यविदत ॥ मनसस्पतिना दैव्येन वातो यज्ञः प्रयुज्यतां ॥ इति जपित्वा ॥ ममाग्ने ॥१॥

वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ॥ मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृत
नाजयेम ॥ आहवनीयमुपसमिन्धे ॥ यजमानः ॥ अग्निं गृह्णामि सुरथं यो मयोभूर्य उद्यन्तमा
रोहति सूर्यमह्ने ॥ आदित्यं ज्योतिषां ज्योतिरुत्तमं श्वो यज्ञाय रमतां देवताभ्यः ॥ अथ य
ज्ञाय रमतामिति निचियन्तौ ॥ य[illegible] ज्ञाय रमतामिति सर्वस्का भार्या ॥ वसून्रुद्रानादित्यानिन्द्रे
ण सह देवताः ॥ ताः पूर्वः परिगृह्णामि स्व आयतने मनीषया ॥ इमामूर्जं पंचदशीं ये प्रविष्टा
स्तान्देवान्परिगृह्णामि पूर्वः ॥ अग्निर्हव्यवाडिह तानावहतु पौर्णमासं हविरिदमेषां मयि ॥
आमावास्यं हविरिदमेषां मयि ॥ यथालिंगमाहवनीयमन्वाधीयमानं जपति ॥ अंतराग्नी प

६०
॥२॥

पौ०

शर्वरीदयसंस्सदमागमन्॥ तान्पूर्वः परिगृह्णामि स्व आयतने मनीषया॥ अंतराग्नी तिष्ठं ज
पति॥ अध्वर्युः॥ मम देवा विहवे संतु सर्व इंद्रावंतो मरुतो विष्णुरग्निः॥ ममांतरिक्षमुरुगो
पमस्तु मह्यं वातः पवतां कामे अस्मिन्॥ गार्हपत्यमुपसमिंधे॥ यजमानः॥ इह प्रजा विश्व
रूपा रमंतामग्निं गृहपतिमभिसंवसानाः॥ ताः पूर्वः परि० षया॥ इह पशवो विश्वरूपा रमंतां
मग्निं गृह० सानाः॥ तान्पूर्वः परि० षया॥ गार्हपत्येऽन्वाधीयमाने जपति॥ अध्वर्युः॥ मयीदं
या द्रविणमायजंतां मय्याशीरस्तु मयि देवहूतिः॥ दैव्या होतारो वनिषंत पूर्वेऽरिष्टाः स्याम तनुवा
सुवीराः॥ दक्षिणाग्निमुपसमिंधे॥ यजमानः॥ अयं पितॄणामग्निरवाड्ढव्या पितृभ्य आ॥ ॥२॥

तान्पूर्वः परिगृह्णाम्यविषं भः पितृनुं कुरन्॥ दक्षिणाग्निं अन्वाहार्यपचनेऽन्वाधीयमाने विहारस्यो
त्तरतउपनिश्रय॥ इदमहमग्निज्येष्ठेभ्यो वसुभ्यो यज्ञं प्रब्रवीमीदमहमिंद्रज्येष्ठेभ्यो रुद्रेभ्यो वी
वी यज्ञं प्रब्रवीमीदमहं वरुणज्येष्ठेभ्य आदित्येभ्यो यज्ञं प्रब्रवीमी॥ अन्वाहितेषु जपति॥ संन
यजमानः॥ यजमानः॥ पयस्वतीरोषधयः पयस्वद्वीरुधां पयः॥ अपां पयसो यत्पयः स्तेन मामिंद्र सऽ
सृज॥ अप उपस्पृश्य॥ अप आचामति वा॥ पत्नी च॥ अपरेणाहवनीयं दक्षिणातिक्राम
त्येष यथा नु कुर्धं यजमानस्य संचरो भवति॥ दक्षिणेनाहवनीयमवस्थाय व्रतऽसमुद्रस्त
दुपैष्यामि॥ समुद्रं मनसाध्याहा॥ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां॥

द०
॥३॥

पौ०

गायो व्रतपते॥ आदित्य व्रतपते॥ व्रतानां व्रतपते॥ सम्राडसि व्रतपा असि व्रतपतिरसि तन्ते
प्रब्रवीमि तच्छकेयं तेन शकेयं तेन राध्यासं॥ आदित्यमुपतिष्ठते॥ संनयतः॥ अध्वर्युः॥
उत्तरेण गार्हपत्यमसिदानि हितो भवति॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता
भ्यामाददे॥ असिदमादाय॥ यज्ञस्य घोषदसि॥ गार्हपत्यमभिमन्त्र्य॥ प्रत्युष्टं रक्षः प्रत्यु
ष्टा अरातयः॥ गार्हपत्ये असिदं प्रतितपति॥ प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया
वितष्टा त आवहन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे॥ असिदं कुमंदुं वादाय गच्छ
ति॥ उर्वन्तरिक्षमन्विहि॥ हरति॥ प्राचीमुदीचीं वा दिशमभिप्रक्रम्य॥ यतः कुतश्चिद्दर्भमयं ब

॥२॥

र्हिराहरति॥ देवानां परिषूतमसि वर्षवृद्धमसि॥ दर्भान्परिषौति॥ अतिसृष्टो गवां भागः॥ एको
द्वे तिस्रो वा नाडीरुत्सृजति॥ अप उपस्पृश्य॥ इदं देवानां॥ परिषूतानभिमृशति॥ इदं पशूनां॥
अतिसृष्टान्॥ देवस्य त्वा॰ भ्यां बर्हिर्देवसदनमारभे॥ विशाखेषु दर्भानारभते॥ देवबर्हिर्मा
त्वान्वङ् मा तिर्यक्॥ सव्येन पाणिना दृढमुष्टिं करोति॥ संयच्छति॥ पर्व ते राध्यासं॥ असिद
मधिनिदधाति॥ आच्छेत्ता ते मा रिषं॥ आच्छिनत्य् अप उपस्पृश्य॥ पृथिव्याः संपृचः पाहि॥ अ
नधो निदधाति॥ सप्रस्तरः॥ एवं देवस्य त्वा आदि पृथिव्याः संपृचः पाहि॥ इत्येतं त्रिरावर्तते॥ तदे
कं निधनमेवं भीति निधनानि लुनाति॥ देवबर्हिः शतवल्शं विरोह॥ आलवानभिमृशति॥ सह

द०
।।४।।

पौ०

स्वर्वन्त्वा वियद्यं कृहेम।।आत्मानं प्रत्यभिमन्त्रमापउपस्पृश्य।।अदित्यैरास्नासि।।निधानुपं
चधानुपाशंत्वंकरोति।।अयुत्पन्ना योनिः।। प्रतिनिदधाति।।धानौधालौमंत्रमावर्तयते।।अ
दित्यैरास्नासि।।उदगग्रेचितन्वया।।सुसंभृतात्वासंभरामि।। नम्भिन्धिनानिसंभृत्य।।अनुभि
तायोनिः।।उत्तमेनिधनेप्रस्तरमत्साधाय।।इंद्राण्यैःसन्नहनं।।सन्नह्यति।। पूषाते ग्रंथिं ग्रथ्नातु।।
ग्रंथिंकरोति।।सतेमास्थात्।।पुरस्तात्प्रत्यंचंग्रंथिमुपगूहति।।पश्चात्प्राञ्चंवा।।आपस्त्वाम
श्विनौत्वामृषयःसप्तमामृजुः।।बर्हिःसूर्यस्यरश्मिभिरुषसांकेतुमारभे।।बर्हिरारभते।।इंद्र
स्यत्वाबाहुभ्यामुद्यच्छे।।उद्यच्छति।।बृहस्पतेर्मूर्ध्नाहरामि।।शीर्षन्नधिनिधत्ते।।प्रेयमगा०।। ।।४।।

उर्वन्तरिक्षमन्विहि।।यौगमनौनौप्रत्यायनौ।।अदित्यास्त्वोपस्थेसादयामि।।अंतर्वेदिपरि
धिदेशेनधःसादयति।।अत्रपौर्णमास्यां व्रतोपायनं।। पयस्वतीरित्यादिसोपस्थानांतं।।
अध्वर्युः।।बर्हिरसिदेवंगमं।।आसन्नमभिमंत्रयते।।देवंगमनमसि।।अनधोनिदधाति।।यथा
प्रागुपसादयेत्।।तूष्णींदर्भेद्वेगत्वा।।याजाताओषधयोदेवभ्यस्त्रियुगंपुरा।।तासांपर्व
राध्यासंपरिस्तरमाहरन्।।अस्मिदमधिनिदधाति।।अपांमेध्यंयज्ञियंसदेवंशिवमस्तु
मे।।आच्छेत्तावोमारिषंजीवानिशरदःशतं।।अच्छिन्नस्यपउपस्पृश्य।।अपरिमितानांपरि
मिताःसन्नह्येसुकृतायकं।।एनोमानिगांकृतमच्छनाहंपुनरुत्थायबहुलाभवंतु।।परिस्त

रणामन्त्रिदादिविधानस्य छेदनस्यान्वाहरणादि यथालिङ्गं करोति॥ तूष्णीं परिभोजनीमुष्टिं पराञ्जी
च॥ तूष्णीमिध्मं छित्वा॥ अप उपस्पृश्य॥ पूर्ववत् तूष्णीं शुल्बं करोति॥ तूष्णीमुदगग्रं वितत्य॥
यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन्॥ ततस्त्वामेकं विग्ं शतिधा संभरामि सुसंभृता॥ त्री
न्परिधींग्स्तिस्रः समिधो यज्ञायुरनुसंचरान्॥ उपवेषं मेक्षणं धृष्टिग्ं संभरामि सुसंभृता॥ शुल्ब
इध्मग्ं संभरति॥ कृष्णोऽस्याखरेष्ठो देवपुरश्चर सध्यास्त्वं॥ संनह्यति॥ अनधो निदधाति॥
इध्मप्रव्रश्चनानि निदधाति॥ त्वया वेदिं विविदुः पृथिवीं त्वया यज्ञो जायते विश्वदानिः॥ अच्छि
द्रं यज्ञमन्वेषि विद्वान् त्वया होता संतनोत्यर्धमासान्॥ दर्भाणां वेदं कृत्वा शुल्बात्सादिदेशोपरि

वास्य॥ वेदपरिवासनानि निदधाति॥ आमावास्यायां वेदो वेदिः॥ प्रागुत्तरात्परिग्रहात्कृ
त्वा॥ उपवेषोऽसि यज्ञाय त्वां परिवेषमधारयन्॥ इन्द्राय हविः कृण्वन्तः शिवः शग्मो भवासि नः॥
यस्य कस्यचित् काष्ठस्योपवेषं करोति॥ समूह्याग्न्यागारमुपलिप्य संस्थायतनान्यलंकुर्वीत यज
मानः पत्नी च॥ परिस्तृणीत परिधत्ताग्निं परिहितोऽग्निर्यजमानं भुनक्तु॥ अपाग्ं रस ओषधी
नाग्ं सुवर्णो निष्कादृमे यजमानस्य संनुकामदुघा अमुत्रामुष्मिंल्लोके॥ परिस्तरणीनामेतामेके
समामनन्ति॥ उदगग्रैः प्रागग्रैश्च दर्भैरग्नीन्परिस्तृणाति॥ यजमानः॥ उभावग्नी उपस्तृणते
देवता उपवसन्तु मे॥ अहं ग्राम्यानुपवसामि मह्यं गोपतये पशून्॥ सायं परिस्तीर्यमाणे युग्मपति॥

देवादेवेषुपराक्रमध्वं प्रथमाद्वितीयेषुद्वितीयास्तृतीयेषुत्रिरेकादशाइहमावत्त॥ इदंसूत्रा
वेयंयदिदंकुरोम्यात्माकुरोत्वात्मने॥ इदंकुरिष्येभेषजमिदंमेविश्वभेषजा॥ अश्विनाप्रावतं
युवं॥ नपित्वोपविशन्ति॥ स्थस्कास्थायामपिदेवादेवेषुजपः॥ एतन्त्वोपविशन्ति॥ उदितआ
दित्येपौर्णमास्यास्तंत्रंप्रक्रमयन्ति॥ प्रागुदयादमावास्यायाः॥ चत्वारऋत्विजः पूर्ववदग्नीन्प
रिस्तृणाति॥ यच्चपरिस्तीर्णंभवति॥ अध्वर्युः॥ बर्हिर्णेवादेवेभ्यःशक्नुयं॥ हस्तावनिज्य॥ यु
ज्ञस्यसंततिरसियज्ञस्यत्वासंततैस्तृणामिसंततैत्वायज्ञस्य॥ गार्हपत्याच्चक्रम्यसंततामु
त्तरपराजीघंस्तृणात्याहवनीयात्॥ तूष्णींदक्षिणामुत्तरांच॥ दक्षिणेनाहवनीयंब्रह्मयज

मानयोरास्तनेप्रकल्पयन्ति॥ पूर्वंब्रह्मणः॥ अपरंयजमानस्य॥ उत्तरेणगार्हपत्याहवनीयौ
दर्भान्संस्तीर्य॥ तेषुद्वंद्वंन्यंचिपात्राणिप्रयुनक्ति॥ दशापवित्राणिदशापूर्णानिपरतः॥ स्फ्यश्च
कपालानिचाग्निहोत्रहवणींचशूर्पंचकृष्णाजिनंचोलूखलंचमुसलंचदृषच्चोपलाच॥ चरुस्थाली
पुरस्तात्॥ स्रुवंजुहूंउपभृतंध्रुवांवेदंपात्रींआज्यस्थालींप्राशित्रहरणंइडापात्रंप्रणीताप्रण
यनमितिपूर्वाणितान्युत्तरेणावशिष्टानि॥ अन्वाहार्यस्थालीमुपवेषंयोक्त्रंमेक्षणंमदंतसर्थय
दाग्राणीध्मप्रव्रश्चनानिपिष्टलेपफलीकरणपात्रंच दर्भांश्च॥ अत्रपवित्रेकरोति॥ समावप्र
च्छिन्नाग्रौद्वौदर्भौप्रादेशमात्रौपवित्रेकुरुते॥ पवित्रेस्थोवैष्णवीवायुर्वोमनसापुनातु॥

तृणं काष्ठं वा अन्तर्धाय छिन्नं भिन्नं नखेन अप उपस्पृश्य ॥ विष्णोर्मनसा पूते स्थः ॥ अद्भिरुपस्पृश्य ॥
अध्वर्युर्यजमानश्च ब्रह्माणं वृणीते ॥ भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमहे ॥
ब्रह्मा ॥ वृतोऽस्मि कर्म करिष्यामीत्युक्त्वा ॥ समस्तपाण्यंगुष्ठोग्रेणाहवनीयं परीत्य ॥ निरस्तः परा
वसुः ॥ ब्रह्मसदनात् तृणं प्रसव्य दक्षिणा निरसेत् ॥ अप उपस्पृश्य ॥ इदमहमर्वावसोः सदने
सीदामि ॥ दक्षिणतः कुशेषूपविशेत् ॥ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गो
पाय ॥ उपविश्य जपेत् ॥ उपविष्टे ब्रह्मणि ॥ अध्वर्युः ॥ वानस्पत्योऽसि देवेभ्यः शुन्धस्व ॥ प्रणीता
प्रणयनं चमसमद्भिः प्रक्षालयति ॥ अपरेण गार्हपत्यं पवित्रान्तर्हितं चमसं निधाय ॥ अनया पृ

थिव्यापो गृहीष्यामि पृथिवीं मनसा ध्यायेत् ॥ को वो गृह्णाति स वो गृह्णातु कस्मै वो गृह्णामि तस्मै
वो गृह्णामि यो यास्य वः ॥ तस्मिन्नप आनयति ॥ अनया पृथिव्यापो गृह्णामि ॥ पृथिवीं ध्यात्वा ॥
संपूरयित्वा उपबिलं चमसं [illegible] सूर्याभिमन्त्र्य ॥ देवो वः सवितोत्पुनातु ॥ अच्छिद्रेण पवित्रेण ॥ वसोः सूर्यस्य र
श्मिभिः ॥ त्रिरुत्पू[illegible] ॥ आपो देवीरग्रेपुवो अग्रेगुवोऽग्र इमम् अद्य यज्ञं नयताग्रे यज्ञपतिं धत्त
वृणीत युष्मानिंद्रोऽवृणीत वृत्रतूर्ये यूयमिंद्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिता स्थ ॥ ब्रह्मन्नपः प्रणेष्यामि यजमान
वाचं यच्छ ॥ संप्रेष्यति ॥ ब्रह्मा ॥ भूर्भुवः स्वर्बृहस्पतिप्रसूतः ॥ ॐ प्रणय ॥ अनुजानाति ॥ अ
ध्वर्युः ॥ को वः प्रणयति स वः प्रणयत्वपो देवीः प्रणयामि यज्ञं संसादयेनुनः ॥ इदं मर्दती

घृतपृष्ठा उदाकुः सहस्रपोषं यजमानेन संचरतीः॥ समं प्राणैर्धार्यमाणः स्रुकेनोपसंगृह्य॥
चिषिंचन्तरति॥ अनयापृथिव्यापः प्रणयानि ध्यायेत्॥ यजमानः॥ भूश्चकश्च वाक्चर्च
गौश्च वट्च खंच धूश्च नूश्च पृश्च एकाक्षराः पूर्वदेशा माविराजो या इदं विश्वं भुवनं व्यानशुस्ता
नो देवीस्तरसा संविदानाः स्वस्ति यज्ञं नयत प्रजानतीर्ब्रह्मपूता स्थ॥ को वो युनक्ति स वो
युनक्तु विश्वेभ्यः कामेभ्यो देवयज्यायै॥ याः पुरस्तात्प्रस्रवन्त्युपरिष्टात्सर्वतश्च याः॥ ताभि
रश्मिपवित्राभिः श्रद्धां यज्ञमारभे॥ प्रणीताः प्रणीयमाना अनुमन्त्रयते॥ अध्वर्युः॥ को वो यु
नक्ति स वो युनक्तु॥ उत्तरेणाहवनीयमसंस्पृष्टा ध्रुवे सादयति॥ नैगमंतिनेळमंत्यासं

स्थालीदर्भैरभिप्रच्छाद्य॥ संविशन्तां दैवीर्विशः पात्राणि देवयज्यायै॥ सपवित्रेण पाणिना पा
त्राणि संमृश्य॥ असंभवन्तो मंत्रावृत्तिः॥ वानस्पत्यासि दक्षाय त्वा॥ अग्निहोत्रहवणीमादत्ते॥
वेषाय त्वा॥ शूर्पं॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः॥ आहवनीये प्रतितप्य॥ यजमान हवि
र्निर्वप्स्यामि॥ ॐ निर्वपेति यजमानः॥ प्रवसति यजमाने अग्ने हविर्निर्वप्स्यामि॥ उर्वं
तरिक्षमन्विहि॥ शकट्याभिप्रव्रजति॥ शकटाभावे पात्र्यां निर्वपेत्॥ अपरेण गार्हपत्य
मुपविश्य दक्षिणतः स्फ्यमुपधाय व्रीहिमतीं यवमतीं वा पात्रीमन्वारभ्य तस्यां सर्वां स्रुवं
रमंत्रान्जपेत्॥ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः॥ त्वं देवानामसि

सक्षितमं पप्रितमं जुष्टतमं वन्हितमं देवहूतमं ॥ विष्णुस्त्वाक्रं̐स्त ॥ अहुतमसि हविर्धानं दृं̐हस्व मा ह्वाः ॥ मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिं̐सिषं ॥ पुरोडाशीयान्प्रेक्षते ॥ निरस्तं̐ रक्षो निरस्तो अघशं̐सः ॥ तृणादीनि निरस्यापउपस्पृश्य ॥ उर्वन्तरिक्षः पथा मद्र्धेहि ॥ निरस्तमभिमन्त्र्य ॥ दशहोतारं व्याख्यास्याम ॥ चित्तिः स्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः ॥ आधीतं बर्हिः ॥ केतो अग्निः ॥ विज्ञातमग्निः ॥ वाक्पतिर्होता ॥ मन उपवक्ता ॥ प्राणो हविः ॥ सामाध्वर्युः ॥ शूर्पे पवित्रे निधाय ॥ तस्मिन्नग्निहोत्रहवण्या हवीं̐षि निर्वपति ॥ यच्छंतां पंच ॥ मुष्टिं गृहीत्वा ॥ स्त्रिर्मुष्टिमोप्य ॥ देवस्य त्वा० पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि ॥ त्रिर्य ॥१॥

जुषा तूष्णीं चतुर्थं ॥ यजमानः ॥ अग्निं̐ होतारमिह तं̐ हुवे देवान्यज्ञियानिह यान्हवामहे ॥ आयन्तु देवाः सुमनस्यमाना वियन्तु देवा हविषो मे अस्य ॥ हविर्निरूप्यमाणमभिमन्त्रयते ॥ अध्वर्युः ॥ निरुप्तेष्वन्वोप्य ॥ एवमुत्तरं यथादैवतं ॥ देवस्य त्वा० हस्ताभ्यामग्नीषोमाभ्यां जुष्टं नि० यच्छंतां पंच ॥ तूष्णीं चतुर्थं ॥ निरुप्तेष्वन्वोप्य ॥ यच्छंतां पंच ॥ देवस्य त्वा० हस्ताभ्यामिंद्राय वैमृधाय जुष्टं निर्वपामि ॥ इति पौर्णमास्यां ॥ इंद्राग्निभ्यां जुष्टं निर्वपामि० इत्यमावास्यायां ॥ निरुप्तेष्वन्वोप्य ॥ इदं देवानां ॥ निरुप्तानभिमृशति ॥ इदमु नः सह ॥ अवशिष्टान् ॥ स्फात्यै त्वा नारात्यै ॥ निरुप्तानेवाभिमृशति ॥ इदमहं निर्वरुणस्य पाशात् ॥ उपनिष्क्रम्य ॥

द० ॥१०॥ पौ०

स्वरभिव्यख्यं प्राङ्प्रेक्षते ॥ सुवरभिविख्येषं ॥ सर्वं विहारमनुवीक्ष्यते ॥ वैश्वानरं ज्योतिः ॥
आहवनीये ॥ स्वाहा द्यावापृथिवीभ्यां ॥ स्कन्नानभिमंत्र्य ॥ दृꣳहंतां दुर्या द्यावापृथिव्योः ॥ प्रसव
रोह ॥ उर्वंतरिक्षमन्वीहि ॥ हरति ॥ अदित्यास्त्वोपस्थे सादयामि ॥ अग्ने हव्यꣳ रक्षस्वाग्नीषो
मौ हव्यꣳ रक्षेथामिंद्राय वैमृध हव्यꣳ रक्षस्व ॥ इति पौर्णमास्यां ॥ अग्ने हव्यꣳ रक्षस्वेंद्राग्नी हव्यꣳ
रक्षेथामित्यमावास्यायां ॥ अपरेणाहवनीयं यथादेवतमुपसादयति ॥ यजमानः ॥ कस्त्वा
युनक्ति स त्वा युनक्तु ॥ सर्वं विहारमनुवीक्षते ॥ अध्वर्युः ॥ सम्भृत्याभ अग्निहोत्रहवण्यामप
आनीय ॥ पूर्ववदुत्पूयाभिमंत्र्य ॥ ब्रह्मन्प्रो[illegible]क्षिष्यामि ॥ ब्रह्माणमामंत्रयते ॥ ब्रह्मा ॥ ॥१०॥

भूर्भुवः स्वर्बृहस्पतिप्रसूतः ॥ ॐ प्रोक्ष्य ॥ अध्वर्युः ॥ देवस्य त्वा० हस्ताभ्यामग्नये वो जुष्टं प्रो
क्षा[illegible]म्यग्नीषोमाभ्यां वो जुष्टं प्रोक्षामींद्राय वैमृधाय वो जुष्टं प्रोक्षामि । इति पौर्णमास्यां ॥ अग्न
ये वो जुष्टं प्रोक्षामीन्द्राग्निभ्यां वो जुष्टं प्रोक्षामि ॥ इत्यमावास्यायां ॥ त्रिर्हवींषि प्रोक्षति ॥ सकृन्मं
त्रेण द्विस्तूष्णीं ॥ उत्तानानि पात्राणि पर्यावृत्य ॥ शुंधध्वं दैव्याय कर्मणे देवयज्यायै ॥ पात्राणि
त्रिः प्रोक्षति ॥ सकृन्मंत्रेण द्विस्तूष्णीं ॥ प्रोक्षणीशेषमग्रेण गार्हपत्यं निधाय ॥ देवस्य त्वा० हस्ता
भ्यामाददे ॥ कृष्णाजिनमादाय ॥ अवधूतꣳ रक्षोऽवधूता अरातयः ॥ उत्करे त्रिरवधूनोति ॥
ऊर्ध्वग्रीवं बहिष्पाद्विशासने ॥ अदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु ॥ उत्तरेण गार्हपत्यमुत्कर

देशो वा प्रतीचीनग्रीवमुत्तरलोमोपस्तृणाति पुरस्तात्प्रतीचीभसदमुपसमस्यति अनुस्तृत
मृष्टकृष्णाजिनं। अधिषवणमसि वानस्पत्यं प्रति त्वादित्यास्त्वग्वेत्तु॥ तस्मिन्नुलूखलमधि
वर्तयन्ननुसृजन्नुलूखलं। अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि॥ तस्मिन्ह
विरावपति॥ त्रिर्यजुषा तूष्णीं चतुर्थं॥ अद्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्यं सुश
मि शमिष्व॥ मुसलमादाय॥ हविष्कृदेहि॥ त्रिराह्वयति पत्नीं॥ अवरक्षो दिवः सपत्नं व
ध्यासं॥ अवहन्ति॥ उच्चैः समाहन्तवै॥ इति संप्रेष्यति॥ आग्नीध्रः॥ देवस्य त्वा० हस्ताभ्या
माददे॥ शम्यामादाय॥ इषमावदोर्जमावद द्युमद्वदत वयं संघातं जे[illegible]ष्म॥ दृषदुपले

समाहन्ति॥ द्विर्दृषदि सकृदुपलायां त्रिः संचारयन्नवघ्नन्तः संपादयति॥ यज्ञसमाप्तेः
स्तत्रोपक्रमः॥ अध्वर्युः॥ वर्षवृद्धमसि॥ पुरस्ताच्छूर्पमुपोहति॥ वर्षवृद्धास्थ॥ उलूखल
गतमभिमन्त्र्य॥ प्रति त्वा वर्षवृद्धं वेत्तु॥ शूर्पे हविरुद्वपति॥ परापूतं रक्षः परापूता अरा
तयः॥ उत्करे परापुनाति॥ प्रविद्धं रक्षः पराध्माता अमित्राः॥ तुषान्प्रस्कन्दतो नुमन्त्रयते॥
मध्यमे पुरोडाशकपाले तुषानोप्य॥ रक्षसां भागोसि॥ अधस्तात्कृष्णाजिनस्योपव
प॥ पुनरमपरमवांतरदेशे निरस्यापउपस्पृश्य॥ यजमानः॥ रक्षोभ्य इदं०॥ उभावु
पस्पृशातः॥ अध्वर्युः॥ अद्भिः कपालं संस्पृश्य प्रशान्तं निधाय॥ अपउपस्पृश्य॥

द० ॥१२॥ पौ०

यामुवैवि विन्नन्तु ॥ विविच्य ॥ देवो वः सविता हिरण्यपाणिः प्रतिगृह्णातु ॥ पात्र्यां तण्डुलान्
प्रस्कन्दयत्वा ॥ अदब्धेन त्वा चक्षुषावपश्यामि रायस्पोषाय वर्चसे सुप्रजास्त्वाय चक्षुषो
गोपीथाय आशिषमाशास्ते ॥ अवेक्ष्य ॥ तान्पुनरादाय ॥ तूष्णीमुलूखले न्युप्य ॥ त्रिष्फ
लीकर्तवै ॥ संप्रेष्यति ॥ देवेभ्यः शुन्धध्वं ॥ देवेभ्यः शुन्धध्वं ॥ देवेभ्यः शुन्धध्वं ॥ पत्न्यव
हन्ति ॥ सर्वत्र मंत्रेण द्विस्तूष्णीं ॥ सुफलीकृतान्करोति ॥ तूष्णीं वा ॥ प्रक्षाल्य तण्डुलान् ॥ त्रि
ष्फलीक्रियमाणानां यो न्येगो अवशिष्यते ॥ रक्षसां भागधेयमापस्त्वं प्रवहतादितः ॥ उल
रे त्रिर्निनीय ॥ यजमानः ॥ रक्षोभ्यस्त्वा० ॥ अप उपस्पृश्यातः ॥ अभ्यर्ण्याजिनादानादि ॥१२॥

प्रागधिवर्तनात्कृत्वा ॥ दिवस्कंभनिरसि प्रति त्वादिसारावेत्तु ॥ कृष्णाजिन उदीचीन
कुंबां शम्यां निधाय ॥ धिषणासि पर्वत्या प्रति त्वा दिवस्कंभनिर्वेत्तु ॥ शम्यां दृषदमत्या
धाय ॥ धिषणासि पार्वतेयी प्रति त्वा पर्वतिर्वेत्तु ॥ दृषदुपलामत्यादधाति ॥ पूर्ववदनुसर्गः ॥
अंशुरसि मधुमन्तं नः ॥ तं तण्डुलानभिमन्त्र्य ॥ देवस्य त्वा० हस्ताभ्यामग्नये जुष्टमधिवपा
म्यग्नीषोमाभ्यां जुष्टमधिवपामींद्राय वैमृधाय जुष्टमधिवपामि धान्यमसि धिनुहि
देवान् ॥ इति पौर्णमास्यां ॥ अग्नये जुष्टमधिवपामींद्राग्निभ्यां जुष्टमधिवपामि ॥ इत्य
मावास्यायां ॥ यथादेवतं दृषदि तण्डुलानधिवपति ॥ त्रिर्यजुषा तूष्णीं चतुर्थं ॥ प्राणाय त्वा ॥

द०
॥१३॥

पौ०

प्राचीमुपलं प्रोहति ॥ अपानाय त्वा ॥ प्रतीचीं ॥ व्यानाय त्वा ॥ मध्यदेशे व्यवधारयति ॥
प्राणाय त्वापानाय त्वा व्यानाय त्वा ॥ संततेऽपिनह्यति ॥ दीर्घामनुप्रसितिमायुषे धां ॥ प्राची
मंततोऽनुपोह्य ॥ देवो वः सविता हिरण्यपाणिः प्रतिगृह्णातु ॥ कृष्णाजिने पिष्टानि प्रस्कं
दयित्वा ॥ अदब्धेन वश्चक्षुषावेक्षे ॥ अवेक्ष्य ॥ असंवपन्ती पिᳪषाणि कुरुतात् ॥ सं
प्रेष्यति ॥ पत्नी पिनह्यति दासी वा पिनह्यति अपि वा भृत्या पिनह्यति ॥ पिष्टे पात्र्यां गृहीत्वा
निदधाति ॥ आहवनीये गार्हपत्ये वा हवीᳪषि श्रपयति ॥ धृष्टिरसि ब्रह्म यच्छ ॥ उप
वेषमादाय ॥ रक्षसः पाणिं दहाहिरसि बुध्न्यः ॥ अभिमंत्र्य ॥ अपाग्नेऽग्निमामादं जहि ॥ ॥१३॥

आहवनीयात्प्रतीचावंगारौ निर्वर्त्य ॥ निष्क्रव्यादᳪ सेध ॥ तयोरन्यतरमुत्तरमपरम
वांतरदेशे निरस्याप उपस्पृश्य ॥ आदेवयजं वह ॥ दक्षिणमवस्थाप्य ॥ ध्रुवमसि पृथि
वीं दृᳪहायुर्दृᳪह प्रजां दृᳪह सजातानस्मै यजमानाय पर्यूह ॥ तस्मिन्नंगारे मध्यमं पुरो
डाशकपालमुपदधाति ॥ निर्दग्धᳪ रक्षो निर्दग्धा अरातयः ॥ कपालेंगारमत्याधाय ॥
धर्त्रमस्यंतरिक्षं दृᳪह प्राणं दृᳪहापानं दृᳪह सजाता० ॥ मध्यमात्प्राचीं ॥ धरुणमसि
दिवं दृᳪह चक्षुर्दृᳪह श्रोत्रं दृᳪह सजाता० ॥ तस्मात्पुरतः ॥ चिदसि विश्वासु दिक्षु सी
द ॥ मध्यमाद्दक्षिणं ॥ परिचिदसि विश्वासु दिक्षु सीद ॥ मध्यमादुत्तरं ॥ मरुतां शर्धोसि ॥

मध्यमात्पश्चात्॥ यथायोगमितराणि॥ धर्मासि दिशो दृꣳह योनिं दृꣳह प्रजां दृꣳह सजातान॰॥
आग्नेयं॥ चितस्थ प्रजामस्मै रयिमस्मै सजातान॰॥ ऐन्द्राग्नं॥ एवमितरयोरशावुपधाय॥
चितस्थोर्ध्वचितः॥ इति श्रोणिं यथायोगमुपधाय॥ तूष्णीं वा॥ भृगूणामङ्गिरसां तपसा
तप्यध्वं॥ वेदेन कपालेष्वङ्गारानध्यूह्य॥ मदन्तीरधिश्रयति॥ प्रक्षालितायां पात्र्यां निष्टप्तो
पवातायां पवित्रवत्यां पिष्टानि संवपति॥ देवस्य त्वा॰ हस्ताभ्यामग्नये जुष्टꣳ संवपाम्यग्नी
षोमाभ्यां जुष्टꣳ संवपामीन्द्राय वैमृधाय जुष्टꣳ संवपामि॥ त्रिर्यजुषा तूष्णीं चतुर्थं॥ इति
पौर्णमास्यां॥ अग्नये जुष्टꣳ संवपामीन्द्राग्निभ्यां जुष्टꣳ संवपामि॥ इत्यमावास्यायां॥

संवपन्वाचं यच्छति॥ तामभिवासमन्विसृजते॥ प्रोक्षणीषु पिष्टान्युत्सूय॥ स्रुवेण प्रणीताभ्य
प आदाय॥ वेदेनोपयम्य॥ समापो अद्भिरग्मत समोषधयो रसेन सꣳ रेवतीर्जगतीभिर्म
धुमतीर्मधुमतीभिः सृज्यध्वं॥ पिष्टेष्वानयति॥ अद्भ्यः परि प्रजाताः स्थ [illegible] समद्भिः पृच्य
ध्वं॥ तप्ताभिरनुपरिप्लाव्य॥ जनयत्यै त्वा संयौमि॥ मेक्षणेन संयुत्य॥ मखस्य शिरोसि॥
पिंडं कृत्वा॥ यथाभागं व्यावर्तध्वं॥ आग्नेयं विभज्य॥ यथाभागं व्यावर्तेथां॥ इतरौ समामिं
डान्कृत्वा॥ इदमग्नीषोमयोः॥ इदमिन्द्रस्य वैमृधस्य॥ यथादैवतमभिमृशति॥ अंत्य
योरेव निर्देशः॥ इति पौर्णमास्यां॥ इदमग्नेः॥ इदमैन्द्राग्नं॥ इत्यमावास्यायां॥ अ

तुंगमनपूपावस्तृणाति कूर्मस्येव प्रतिष्ठाति मध्यशापमात्रं पिंडं कृत्वा ॥ इदमहꣳ सेनाया अभी
त्वर्यै मुखमपोहामि ॥ वेदेन कपालेभ्योंगारानपोह्य ॥ प्रतिकपालयोगं मंत्रावृत्तिः ॥ घर्मोसि
विश्वायुः ॥ आग्नेयं पुरोडाशमष्टासु कपालेष्वधिश्रयति ॥ प्रति पुरोडाशं मंत्रावृत्तिः ॥ उरु
प्रथस्वोरु ते यज्ञपतिः प्रथतां ॥ प्रथइत्वा ॥ त्वचं गृह्णीष्व ॥ अद्भिः श्लक्ष्णी करोति ॥ अंतरि
तꣳ रक्षोंतरिता अरातयः ॥ सर्वाणि हवीꣳषि त्रिः पर्यग्नि कृत्वा ॥ देवस्त्वा सविता श्रपयतु
वर्षिष्ठे अधिनाके ॥ उल्मुकैः प्रतितपति ॥ अग्निस्ते तनुवं माति धागग्ने हव्यꣳ रक्षस्व ॥
कमादर्भैरभिज्वलयति ज्वालैर्वा ॥ अविदहंतश्रपयित ॥ इति वाचं विसृजते ॥ आग्नीध्रो ॥१५॥

हवीꣳषि सुश्रुतानि करोति ॥ सं ब्रह्मणा पृच्यस्व ॥ वेदेन पुरोडाशो सांगारं भस्माध्यूहति ॥
अंगुलिप्रक्षालनं पात्रीनिर्णेजनं चोल्मुकेनाभितप्य ॥ स्फ्येनांतर्वेदि तिस्रो रेखा लिखति प्रा
चीरुदीचीर्वा ॥ तास्वसꣳस्पर्शयन् त्रिर्निनयति ॥ प्रसृगपवर्गं प्रागपवर्गं वा ॥ एकता
यस्वाहा ॥ यजमानः ॥ एकतायेदं० ॥ द्वितायस्वाहा ॥ द्वितायेदं० ॥ त्रितायस्वाहा ॥ त्रिता
येदं० ॥ अध्वर्युः ॥ निनीयमानमभितपदभिनयेत् ॥ इत्यापस्तंबसूत्रे दर्शपूर्णमासस्य
प्रथमः प्रश्नः ॥ ॐ तत्सत् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
ॐ देवस्य त्वा० माददे ॥ स्फ्यमादाय ॥ इंद्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा

पौ०

द० ॥१६॥ द्यामुरस्यतिग्मतेजाः॥ स्फ्यमभिमन्त्र्य॥ हरस्ते मा प्रतिगां॥ स्रुवं च दर्भैश्च संमृज्य॥ दर्भ
मुत्करे निरस्याप उपस्पृश्य॥ अपरेणाहवनीयमाग्निमपरिमितां प्राचीं वेदिं करोति॥ ^ यजमान
वेदेन वेदिं विविदुः पृथिवीं सा पप्रथे पृथिवी पार्थिवानि॥ गर्भं बिभर्ति भुवनेष्वन्तः ततो य
ज्ञो जायते विश्वदानिः॥ पुरस्तात्स्तंबयजुषा वेदेन वेदिं त्रिः संमार्ष्टि॥ यजमानः॥ सतुः त्रि
यं त्र्यमुवतिः सुपेशा घृतवती भुवनस्य मध्ये॥ मर्मृज्यमाना महते सौभगाय मह्यं धुक्ष्व
यजमानाय कामान्॥ वेदिं संमृज्यमानां॥ अध्वर्युः॥ पूर्वार्द्धे वेदेर्वितृतीयदेशे स्तंबय
जुर्हरति॥ पृथिव्यै वर्मासि॥ तत्रोदगग्रं प्रागग्रं वा दर्भं निधाय॥ पृथिवि देवयजन्योषध्या ॥१६॥

स्ते मूलं मा हिंसिषं॥ तस्मिंस्फ्येन प्रहृत्य॥ अप उपस्पृश्य॥ अपहतो ररुः पृथिव्यै॥
स्फ्येन स्तृणात्यां स्तृनपादाय॥ व्रजं गच्छ गोस्थानं॥ हरति॥ यजमानः॥ योमाद्दामन
सायश्चया न्याचा यो ब्रह्मणा कर्मणा द्विष्टि देवाः॥ यश्च तेन हृदयेन इष्टता च तस्मै त्वं वज्रेण शिर
श्छिन्द्धि॥ स्तंबयजुर्ह्रियमाणमनुमन्त्रयते॥ अध्वर्युः॥ वर्षिष्ठ उते द्यौः॥ वेदिं प्रसमेष्य॥
बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्॥
उत्करे निवपति॥ अररुस्ते दिवं मा स्कान्॥ स्फ्यमाग्नीध्रोञ्जलिनाभिगृह्णाति॥ यजमानः॥
^ वो इदं तस्मै हर्म्यं करोमि यो वो देवाश्चरति ब्रह्मचर्यम्॥ मेधावी दिक्षु मनसा तपस्व्यन्तर्दूतश्चर

द० पौ०

॥१७॥ निमानुषेषु॥ उत्करमभिगृह्णमाण मनुमंत्रयते॥ अध्वर्युः॥ अपाररुमदेवयजनं पृथिव्याः॥
द्वितीयं प्रहरस॥ अप उपस्पृश्य॥ अपहतोररुः पृथिव्यै देवयजन्यै॥ आदत्ते॥ व्रजं गच्छ-
गोस्थानं॥ हरति॥ यजमानः॥ योस्मान्द्वे० यं च वयं द्विष्मः॥ बधान देव० तमतो मा मौक्॥
उत्करे निवपति॥ आग्नीध्रः॥ अवबाढꣳ रक्षः॥ द्वितीयं गृह्णाति॥ इदं तस्मै० अररुं द्यामा
पप्तत्॥ तृतीयं प्रहरस॥ अप उप० अपहतोररुः पृथिव्या अदेवयजनः॥ आदत्ते॥ व्रजं ग-
च्छ गोस्थानं॥ हरति॥ योस्मान्द्वे० यं च वयं द्विष्मः॥ बधान देव० तमतो मा मौक्॥ उत्करे निवपति॥
आग्नीध्रः॥ अवबाढो घशꣳसः॥ तृतीयं गृह्णाति॥ इदं तस्मै०॥ अध्वर्युः॥ तूष्णीं चतुर्थꣳ ॥१७॥

हरन्॥ सर्वैर्दर्भशेषꣳ हरति॥ योस्मान्द्वे०॥ आग्नीध्रः॥ अवबाढा यातुधानाः॥ चतुर्थं॥
इदं तस्मै०॥ द्रप्सस्ते द्यां मा स्कान्॥ खनित्रमवेक्ष्य॥ स्फ्येन वेदिं परिगृह्णाति॥ वसवस्त्वा
परिगृह्णन्तु गायत्रेण छंदसा॥ दक्षिणतः॥ रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन छंदसा॥ पश्चात्॥
आदित्यास्त्वा परिगृह्णन्तु ~~[illegible]~~ जागतेन छंदसा॥ उत्तरतः॥ यजमानः॥ यज्ञस्य त्वा प्र-
मेयाभिमयाप्रतिमयोन्मया परिगृह्णामि॥ वेदिं परिगृह्णमाणं॥ अध्वर्युः॥ अपाररुमदेव-
यजनं पृथिव्या अदेवयजनो जहि॥ स्फ्येनोत्तमां त्वचमुद्धंति॥ समुद्धतस्य आग्नीध्रः उत्करे
त्रिर्निवपति॥ यजमानः॥ यदुद्धंतो जिहिꣳसिम पृथिवीमोषधीरपः॥ अध्वर्युर्वे स्फ्यकृत

द० ॥११८॥ पौ०

स्येनांतरिक्षंमोरपातुतस्मात्॥ यदुद्धंतोजिहिंसिमक्रूरमस्या वेदिं चकृम मा मनसा देव यं
तः॥ मा तेन हेड उपगाम भूम्याः शिवा नो विश्वैर्भुवनेभिरस्तु॥ उद्धन्यमानां॥ इमां नराः कृणु
त वेदिमेत देवेभ्यो जुष्टामदित्या उपस्थे॥ इमां देवा अजुषंत विश्वे रायस्पोषा यजमानं
विशंतु॥ अध्वर्युः संप्रेष्यति॥ देवस्य सवितुः सवे कर्म कृण्वंति वेधसः॥ उभौ खनतः॥ अ
प उपस्पृशतः॥ यजमानः॥ भूमिर्भूत्वा महिमानं पुपोष ततो देवी वर्धयते पयांसि॥ यज्ञि
या यज्ञं विचयंति शर्यै शं चौषधीरापइह शक्वरीश्च॥ छिद्यमानं॥ ग्रांचौ वेद्यंसावुन्नय
ति॥ प्रतीचीश्रोणी॥ पुरस्तादंहीयसी॥ पश्चात्प्रथीयसी॥ मध्ये संनततरा भवति॥ ॥११८॥

ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामि॥ ब्रह्माणमामंत्रयते॥ ब्रह्मा॥ भूर्भुवः स्वर्बृहस्पतिः प्र
सूतः॥ ॐ परिगृहाण॥ अध्वर्युः॥ ऋतमसि॥ दक्षिणतः॥ ऋतसदनमसि॥ पश्चात्॥ ऋ
तश्रीरसि॥ उत्तरतः॥ यजमानः॥ यज्ञस्य त्वा॰ गृह्णामि॥ वेदिं परिगृह्यमाणं॥ अध्वर्युः॥
धा असि स्वधा अस्युर्वी चासि वस्वी चासि॥ पुरा क्रूरस्य विसृपो विरप्शिन्॥ प्रतीचीं वेदिं पूं
स्फ्येन योयुप्यते॥ उदादाय पृथिवीं जीरदानुर्यामैरयंश्चंद्रमसि स्वधाभिः स्तांधीरासो अनुद
ृश्य यजंते॥ वेदिमनुवीक्षते॥ पश्चार्द्धे वेदितती यदेशे स्फ्यं निर्मेचयं स्तब्ध्वा संप्रेष्यति॥
प्रोक्षणीरासादयेध्मा बर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि पत्नीं सन्नह्याज्येनोदेहि॥

द०
॥१९॥

पौ०

आग्नीध्रः ॥ प्रोक्षणीरभिपूर्य अभिपूर्णमाध्वर्यवे ॥ उदंचꣳ स्फ्यमपोह्य ॥ दक्षिणतः स्फ्य
मसꣳस्पृष्ट्वा उपनिनीय ॥ ऋतसथस्थ पापृथ्म्यः ॥ स्फ्यं स्फ्यवर्त्मनि सादयति ॥ यजमानः ॥
दैव्येकेतुरहमपो देवीरुपब्रुवे दिवानक्तं च सस्रुषीरपस्वरीः ॥ प्रोक्षणीरासाद्यमानाः ॥
अध्वर्युः ॥ शतभृष्टिरसि वानस्पत्यो द्विषतो वधः पाप्मनः ॥ पुरस्तात्प्रत्यंचमुत्करे स्फ्यमु
दस्यति ॥ आग्नीध्रः ॥ हस्तावनिज्य ॥ स्फ्यं प्रक्षाल्य यथाग्रमप्रतिमृशन् ॥ उत्तरेणाहवनीयं
प्रागग्रमिध्माबर्हिरुपसादयति ॥ दक्षिणमिध्मं ॥ उत्तरं बर्हिः ॥ यजमानः ॥ ऊर्णाम्रदं प्रथ
मानꣳ स्योनं देवेभ्यो जुष्टꣳ सदनाय बर्हिः ॥ सुवर्गे लोके यजमानꣳ हि धेहि मा नाकस्य पृष्ठे ॥१९॥

परमे व्योमन् ॥ बर्हिरासाद्यमानं ॥ आग्नीध्रः ॥ घृताचिरेताग्निर्वो ह्वयति देवयज्यायै ॥ स
स्रुवं प्राशित्रं स्रुच आदाय ॥ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः ॥ आहवनीये प्रतितप्य ॥ अनि
शितास्थ सपत्नक्षयणीः ॥ स्रुचोऽभिमंत्र्य ॥ वेदाग्राणि प्रतिविभज्य प्रतिविभज्य तानैः स्रु
चः संमार्ष्टि प्रागग्राः ॥ गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳ संमार्ज्मि ॥ स्रुवमग्रेऽन्तरतो
ऽभ्याकारꣳ सर्वतो बिलमभि समाहारं मूले दंडं ॥ वाचं प्राणं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ
संमार्ज्मि ॥ जुहूमग्रेऽन्तरतोऽभ्याकारं प्राचीं मध्ये बाह्यतः प्रतीचीं मूले दंडं ॥ चक्षुः श्रोत्रं मा नि
र्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ संमार्ज्मि ॥ उपभृतमुदीचीमग्रेऽन्तरतोऽभ्याकारं प्रतीचीं मध्ये

बर्हिन: प्राचीं मृष्टे इदं ।। प्रजां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीं सम्मार्ज्मि ।। मथास्त्रुचमे
वं ध्रुवां ।। रूसं वर्णं पशूनां मा निर्मृक्षं वाजि त्वा सपत्नसाहं संमार्ज्मि ।। स्त्रुवश्चाग्निं हरणं ।। अ
संमृष्टान्न संमृष्टैः सं स्पर्शयति ।। अग्नेर्वो जि ष्ठेन तेजसा निष्टपामि ।। पुनः प्रतितप्य ।। प्रोक्ष्य ।।
अग्रेणोत्करं दर्भेषु सादयति ।। अथ नेनवा ।। स्त्रुक् संमार्जनान्यद्भिः संस्पृश्य ।। दिवः शिल्पमव
ततं पृथिव्याः ककुभिः श्रितं ।। तेन वयं सहस्रवल्शेन सपत्नं नाशयामसि स्वाहा ।। अग्नौ प्र
हरति ।। यजमानः ।। प्रजापतय इदं ।। आग्नीध्रः ।। वेदमाज्यस्थाली योक्त्रं पवित्रे चादाय ।। आ
ग्नीध्रः ।। आशासाना सौमनसं ।। प्रजां सौभाग्यं तनूं ।। अग्नेरनुव्रता भूत्वा ।। सन्नह्ये सुकृताय कं ।। ।।२७।।

अपरेण गार्हपत्यमूर्ध्वज्ञुमासीनां पत्नीं योक्त्रेण सन्नह्यति ।। उत्तरेण नाभिं निष्कृष्य ग्रंथिं कृत्वा
प्रादक्षिणं पर्यूह्य ।। दक्षिणेन नाभिमवस्थाप्योपोक्षाय ।। निष्क्रांतीं वाचयती होके ।। अग्ने गृ
हपते उपमा ह्वयस्व ।। पत्नी गार्हपत्यमुपतिष्ठते ।। देवानां पत्नीरुपमा ह्वयध्वं पत्नि पत्नेषवो वो
कोनमस्ते अस्तु मा मा हिंसीः ।। देवपत्नीरुपतिष्ठते ।। तस्माद्देशादपक्रम्य ।। सुप्रजसस्त्वा
वयं सुपत्नीरुपसेदिम ।। अग्ने सपत्नदंभनमदब्धासो अदाभ्यं ।। दक्षिणत उदीच्युपविशति ।।
इंद्राणीवाविधवा भूयासमदितिरिव सुपुत्रा ।। अस्थूरि त्वा गार्हपत्योपनिषदे सुप्रजास्त्वाय ।।
इति पत्नी जपति ।। सुकामे मन्मन्वासाते ।। यजमानः संप्रेष्यति ।। आग्नीध्रः ।। पृषाते बिब्ले

चिष्यन्तु॥ सपिथनिस्याविछमसावृत्स। दक्षिणाग्नावाज्यं विलाप्य। अदितिरस्यच्छिद्रपत्रा॥
आज्यस्थालीमादाय॥ महीनां पयोस्योषधीनां रसस्तस्य तेक्षीयमाणस्य निर्वपामि देवय
ज्यायै॥ तस्यां पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यं निरुप्य॥ इदं विष्णुर्वि० सुरे। दक्षिणा
ग्नावधिश्रित्य॥ वेदेनाधस्थात्कीर्णं संमृशति॥ इषे त्वा। दक्षिणार्धे गार्हपत्यस्याधिश्रि
त्य॥ ऊर्जे त्वा॥ अपादाय॥ वेदेनोपयम्य पत्न्यै नयन्त्युपहरन्ति॥ तन्निमील्यावेक्ष्यानु
च्छ्वसन्ती आज्यमवेक्षते॥ महीनां पयोस्योषधीनां रसोदब्धेन त्वा चक्षुषावेक्षे सुप्रजास्त्वा
य। तेजोसि। उत्तरार्धे गार्हपत्यस्याधिश्रित्य॥ तेजसे त्वा॥ अपादाय॥ तेजोसि तेजोनुप्रे ॥२१॥

हि। हरन्ति॥ अग्निस्ते तेजो मा विनैत्॥ आहवनीयेधिश्रित्य। अग्नेर्जिह्वासि सुभूर्देवानां
धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भव॥ स्फ्यस्य च त्वं नूसादयति॥ अध्वर्युर्यजमानश्च निमी
ल्यावेक्ष्यानुच्छ्वसन्तावाज्यमवेक्षेते॥ आज्यमसि सत्यमसि सत्यस्याध्यक्षमसि हविरसि वै
श्वानरं वैश्वदेवमुत्पूतशुष्मं सत्यौजाः सहोसि सहमानमसि सहस्वारातीः सहस्वारातीयतः
सहस्व पृतनाः सहस्व पृतन्यतः सहस्रवीर्यमसि तन्मा जिन्व। आज्यस्याज्यमसि सत्यस्य सत्यम
सि सत्यायुरसि सत्यशुष्ममसि सत्येन त्वाभिघारयामि तस्य ते भक्षीय॥ इदं विष्णु०॥ अथैन
उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पुनाति॥ शुक्रमसि॥ ज्योतिरसि॥ तेजोसि॥

देवो वः सवितोत्पुनातु ॥ अच्छिद्रेण पवित्रेण । वसोः सूर्यस्य रश्मिभिः । पूर्ववत्प्रोक्षणीरुत्पु
नाति । यजमानः ॥ अद्भिरज्यमानाभ्यो नापः समुत्पुनीत सवितुः पवित्रैः ॥ ता देवीः शाक्व
रीः शाक्वरेणेमं यज्ञमवत संविदानाः ॥ अथ प्रोक्षणीभ्य उत्पूयमाना उभाभ्यामग्रहांअप
नः ॥ अभिव्कासिनास्रुचेण वेदमुपभृतं दृष्ट्वा नयेद्वा आज्यानि गृह्णाति समं बिलं धारयमाणो
भूमौ जुह्वां ॥ शुक्रं त्वा शुक्रायां धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे गृह्णामि ॥ ज्योतिस्त्वा ज्यो
तिर्विधाम्ने धाम्ने देवे० ॥ अर्चिस्त्वार्चिर्विधाम्ने धाम्ने देवे० ॥ पंचानां त्वा वातानां यंत्राय धर्त्रा
य गृह्णामि ॥ पंचानां त्वर्तूनां यंत्राय धर्त्राय गृह्णामीति पंचावत्तिनः ॥ चतुर्जुह्वां गृह्णाति ॥ ॥२२॥

नोत्कर आज्यानि सादयति ॥ नांतर्वेदि गृहीतस्य प्रतीचीनं हरति ॥ मध्यदेशे उपभृति ॥
पंचानां त्वा दिशां यंत्राय० ॥ पंचानां त्वा पंचजनानां यंत्राय० ॥ पंचानां त्वा सलिलानां धर्त्राय० ॥
पंचानां त्वा पृष्ठानां धर्त्राय० ॥ चपमासि प्रियं देवानामनाधृष्टं देवयजनं देववीतये त्वा गृह्णामी
ति पंचावत्तिनः ॥ चरोस्त्वा पंचबिलस्य यंत्राय० ॥ ब्रह्मणस्त्वा तेजसे यंत्राय० ॥ क्षत्रस्य त्वौ
जसे यंत्राय० ॥ विशे त्वा यंत्राय० ॥ सुवीर्यं त्वा गृह्णामीति पंचावत्तिनः ॥ अष्टावुपभृत्सप्ती
यरुपभृति ॥ भूमौ प्रतिष्ठितासां ध्रुवा मां भूरस्त्वं ध्रुवायां ॥ सुप्रजास्त्वाय त्वा गृह्णामि ॥ रायस्पो
षाय त्वा गृह्णामि ॥ ब्रह्मवर्चसाय त्वा गृह्णामि ॥ भूरस्याकुं हविर्देवानामाशिषो यजमानस्य

द० ॥२३॥ देवानां त्वा देवताभ्यो गृह्णामि॥ कामाय त्वा गृह्णामीति पंचावत्तिनः॥ चतुर्धुधार्यां॥ पूर्वव

प्रोक्षणीरभिमंत्र्य॥ आपो देवी॰ स्थ॥ ब्रह्मन्प्रोक्षिष्यामि ब्रह्माणमामंत्र्य॥ ब्रह्मा॥ भूर्भु

वः स्वर्बृहस्पतिप्रसूतः॥ ॐ प्रोक्ष्य॥ अध्वर्युः॥ मिस्मस्यभ्रं॥ कृष्णोस्याखरेष्ठोग्नये

त्वा स्वाहा॥ त्रिरिध्मं प्रोक्षति॥ वेदिरसि बर्हिषे त्वा स्वाहा॥ त्रिर्वेदिं॥ बर्हिरसि स्रुग्भ्यस्त्वा स्वा

हा॥ त्रिर्बर्हिः॥ सर्वत्र सकृन्मंत्रेण द्विस्तूष्णीं॥ अंतर्वेदि पुरोग्रंथिं बर्हिरासाद्य॥ यजमा

नः॥ असि भ्रेम बर्हिरंतः पृथिव्याः संरोहयंत ओषधीर्विवृक्णाः॥ यासां मूलमुद

वधीः स्फ्येन त्रियावानस्ताः सुख्वा भवंतु॥ सुमनसो यजमानाय संत्वोषधीरापः प्र हरत्वाच्छ ॥२३॥

यो॰ स्वा

रोऽश्च॥ वृष्टिद्यावापर्जन्य एना चिरोहतु हिरण्यवर्णाः शतवल्शा अदब्धाः॥ अंत

र्वेदि बर्हिरासाद्यमानं॥ अध्वर्युः॥ दिवे त्वा॥ अग्रं प्रोक्षति॥ अंतरिक्षाय त्वा॥ मध्यमं॥

पृथिव्यै त्वा॥ मूलं॥ स्रुच्यग्राण्युपपाय्य मूलान्युपपाययति॥ पोषाय त्वा॥ सह स्रुचा

पुरस्तात्प्रसंचं ग्रंथिशेषं प्रसृक्ष्य॥ प्रोक्षणीशेषं मध्वर्युर्यजमानश्च प्राचीनावीति

नौ॥ स्वधा पितृभ्य ऊर्ग्भव बर्हिषद्भ्य ऊर्जा पृथिवीं गच्छत॥ दक्षिणायै श्रोणेरोत्तरस्याः

संततं निनयति॥ यजमानः॥ पितृभ्यो बर्हिषद्भ्य इदं॰॥ यज्ञोपवीती सप उपस्पृश्यतः॥

अध्वर्युः॥ पूषा ते ग्रंथिं विष्यतु॥ बर्हिषो ग्रंथिं विस्रंसयति॥ प्रांचमुद्गूढं प्रसंचमा

द० ॥२७॥ पौ०

यच्छति ॥ विष्णोः स्तूपोसि ॥ वर्षभिर्याहवनीयं प्रति प्रस्तरमादत्ते ॥ नो यौति न प्रयौति ॥
अग्ने प्राणश्चापानश्च यजमानमपिगच्छतां ॥ यज्ञे हभूतां पोतारो पवित्रे हव्यं शोधने यज
माने प्राणापानौ दधामि ॥ तस्मिन्पवित्रे अपिसृज्य ॥ प्राणापानाभ्यां त्वा सतनुं करोमि ॥
अग्रेणाहवनीयं यजमानाय प्रयच्छति यजमानो ब्रह्मणे ब्रह्मा प्रस्तरं धारयति यजमानो
नी वा ॥ दर्भैर्वेदिमंतर्धायपरिभोज[illegible]रन्यैश्च ॥ दक्षिणतः स्तेन हस्तं स्तृणाति ॥ अक्ष्ण
याया ॥ ऊर्णाम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः ॥ बर्हिषा वेदिं स्तृणाति ॥ बहुलम
नतिदृश्नं प्रागपवर्गं प्रसगपवर्गं वा ॥ त्रिधातु पंचधातु वाग्रैर्मूलान्यभिच्छाद्य ॥ धातौ ॥२७॥

धातौ मंत्रमावर्तयते ॥ यजमानः ॥ यनुः स्त्रीरूपं उ युवतिः सुपेशा घृतप्रतीका वयुनानि
वस्ते ॥ स्तास्तीर्यमाणा महते सौभगाय सा मे धुक्ष्व यजमानाय कामान् ॥ शिवा च मे शग्मा चै
धि स्योना च मे सुषदा चैध्यूर्जस्वती च मे पयस्वती चैधी षमूर्जं मे पिन्वस्व ब्रह्म तेजो मे पिन्व
स्व क्षत्रमोजो मे पिन्वस्व विशं पुष्टिं मे पिन्वस्वायुरन्नाद्यं मे पिन्वस्व ॥ प्रजां पशून्मे पिन्व
स्व ॥ आस्तीर्यमाणामनुमंत्रयते ॥ अध्वर्युः ॥ प्रस्तरपाणिः सं स्पृष्टान्परिधीन्परिद
धाति ॥ गंधर्वोसि विश्वावसुर्विश्वस्मादीषतो यजमानस्य परिधिरिड ईडितः ॥ उद
गग्रे मध्यमं ॥ प्रागग्रावितरौ ॥ ध्रुवोसि ध्रुवोहं सजातेषु भूयासं धीरश्चेत्ता वसुवित् ॥
यजमानः ॥

द०
॥२५॥

मध्यमं परिधिं परिधीयमानं ॥ अध्वर्युः ॥ इंद्रस्य बाहुरसि दक्षिणो यजमानस्य परिधि
रिड ईडितः ॥ आहवनीयमभ्यग्रं दक्षिणं ॥ यजमानः ॥ उग्रोस्युग्रो हं सजातेषु भूयास
मुग्रश्चेत्ता वसुवित् ॥ दक्षिणं परिधिं परिधीयमानं ॥ अध्वर्युः ॥ मित्रावरुणौ त्वोत्तरतः
परिधत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडितः ॥ अथाग्रमुत्तरं ॥ यजमानः ॥
अभिभूरस्यभिभूरहं सजातेषु भूयासमभिभूश्चेत्ता वसुवित् ॥ उत्तरं परिधिं परिधी
यमानं ॥ अस्मिन्यज्ञ उप भूय इन्नु मे विक्षोभाय परिधीन्दधामि ॥ धर्ता धरुणो धरीया
नग्निर्द्वेषांसि निरितो नुदातै ॥ परिधीनेवानुमंत्रयते ॥ अध्वर्युः ॥ सूर्यस्त्वा पुरस्तात्पा ॥२५॥

पौ०

तु कस्याश्चिदभिशस्त्याः ॥ आहवनीयमभिमंत्र्यो पर्याहवनीये प्रस्तरं धारयन्नग्नी
न्कल्पयति ॥ यजमानः ॥ युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः ॥ इंधा
नास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥ यन्मे अग्ने अस्य यज्ञस्य रिष्या
द्यद्वा स्कंदादाज्यस्योत विष्णो ॥ तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थे ॥
तेजिष्ठा ते तपना या च रोचना प्रत्योषंतीस्तनुवो यास्ते अग्ने ताभिर्वर्माण्यभितो व्यय
स्व मा त्वा दभन्यज्ञहनः पिशाचाः ॥ आहवनीयमभिमंत्र्य ॥ अध्वर्युः ॥ मध्यमं परिधि
मुपस्पृश्य पुरस्तादूर्ध्वे द्वे आघारसमिधावादधाति ॥ वीतिहोत्रं त्वा कवे द्युमंतं समि

ग्नी

द०
॥२६॥

यो०

धीमह्यग्ने बृहन्तमध्वरे ॥ दक्षिणमाघारसमिधं ॥ समिद्धस्पा मुपेत्वा ॥ उत्तरां ॥ समावयन्त
गर्भौ दर्भौ विधृती कुरुते ॥ विशोयन्त्रे स्थ ॥ अन्तर्वेदि उदगग्रे निधाय ॥ यजमानः ॥ विच्छि
नद्मि विधृतीभ्यां सपत्नाञ्जातान्भ्रातृव्यान्ये च जनिष्यमाणाः ॥ विशोयन्त्रे आभ्यां वि
धमान्येनाम हं स्वानामुत्तमोसानि देवाः ॥ विशोयन्त्रे नुदमाने अरातिं विश्वं पाप्मान
ममतिं दुर्मरायुं ॥ सीदन्ती देवी सुकृतस्य लोके धृती स्था विधृती॰ स्वधृतीः ॥ प्राणान्मा विधा
रयतं प्रजां मा विधारयतं पशून्मा विधारयतं ॥ विधृती आसाद्यमाने ॥ अध्वर्युः ॥ वसूना
रुद्राणामादित्यानां सदसि सीद ॥ नमोः प्रस्तरमत्यादधाति ॥ यजमानः ॥ अयं प्र-

॥२६॥

स्तर उभयस्य धर्ता धर्ता प्रयाजानामुतानुयाजानां ॥ सदाधार समिधो विश्वरूपास्तस्मिन्त्सु
चो अध्यासादयामि ॥ प्रस्तरमासाद्यमानं ॥ अध्वर्युः ॥ जुहूरसि घृताची नाम्ना प्रियेण नाम्ना
प्रिये सदसि सीद ॥ प्रस्तरे जुहूं सादयति ॥ यजमानः ॥ आरोह पथो जुहु देवयानान्यत्रऋ
षयः प्रथमजा ये पुराणाः ॥ हिरण्यपक्षा जिरा संभृतांगा वहासि मा सुकृतां यत्र लोकाः ॥ जुहू
रसि घृताची गायत्र्याम्नी कृचिभिर्जुषाणा अव्यथमाना यज्ञमनु यच्छस्व सुनीतिं यज्ञं नया
स्य पे देवानां गन्ये येन शर्मणा दैव्येन ॥ जुहूमासाद्यमानं ॥ अध्वर्युः ॥ उपभृदसि घृताची ना
म्ना प्रियेण नाम्ना० ॥ उपभृतं सादयति ॥ यजमानः ॥ आ बाहं बाधे उपभृता सपत्नाञ्जाता

द॰ ॥२७॥

न्नात्तव्यानु येन्चजनिष्यमाणाः॥ दौहैमसुरं सुदुघामिव धेनुमहमुत्तरो भूयासमधरे मत्स
पत्नाः॥ उपभृदस्युपभृद् घृताची त्रैष्टुभेन छन्दसा विश्वेदेवाः॥ अवधमाना॰ ऐन्द्रेण शर्मणा
दैव्येन॥ उपभृतमासादयमानं॥ अध्वर्युः॥ ध्रुवासि घृताची नाम्ना॰॥ ध्रुवां सादयति॥
यजमानः॥ यो मा वाचा मनसा दुर्मरायुर्हृदारातीयादभिदासदग्ने॥ इदमस्य चित्तमधरं ध्रु
वाया अहमुत्तरो भूयासमधरे मत्सपत्नाः॥ ध्रुवासि धरणी धनस्य पूर्णा जागतेन छन्दसा
विश्वेदेवाः॥ अवधमाना॰ वैश्वदेवेन शर्मणा दैव्येन॥ ध्रुवामासादयमानं॥ अध्वर्युः॥ वृ
षभोऽसि शाक्वरो घृताची नाम्नं स्रुचः प्रियेण नाम्ना॰॥ स्रुवं सादयति॥ यजमानः॥ स्योनो ॥२७॥

पौ॰ रा

मे सीद सुषदः पृथिव्यां प्रथयि प्रजया पशुभिः सुवर्गे लोके दिवि सीद पृथिव्यामन्तरिक्षेऽह
मुत्तरो भूयासमधरे मत्सपत्नाः॥ अयं स्रुवो अभि जिहर्ति होमान् शतक्षर छन्दसानुष्टुभे
न॥ सर्वा यज्ञस्य समनक्तु विष्णुः बार्हस्पत्येन शर्मणा दैव्येन॥ स्रुवमासादयमानं॥ अध्वर्युः॥
तूष्णीमाज्यस्थालीमपरेण स्रुचः सादयति॥ यजमानः॥ इयं स्थाली घृतस्य पूर्णा अच्छिन्न
पयाः शतधार उत्सः॥ मारुतेन शर्मणा दैव्येन॥ आज्यस्थालीं सादयमानं॥ अध्वर्युः॥
ता असदन्सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियं॥
स्रुचोऽभिमन्त्र्य॥ विष्णुर्निस्थ वैष्णवानि धामानि स्थ प्राजापत्यानि॥ स्रुग्गतान्याज्यानि॥

द०
॥२८॥

पौ०

वेदं पात्रीं माज्यस्थालीं ध्रुवां स्रुवं चादाय ॥ इदमहꣳ सेनाया अभीत्वर्यै मुखमपोहामि ॥ वेदेन पुरोडाशेभ्योंगारानपोह्य ॥ प्रतिपुरोडाशं मंत्रावृत्तिः ॥ सूर्यज्योतिर्विभाहि महत इंद्रियाय ॥ अभिमंत्र्य ॥ आप्यायतां घृतयोनिरग्निर्हव्यानुमन्यतां ॥ खमंक्ष्व त्वचमंक्ष्व सुरूपं त्वा वसुविदं पशूनां तेजसाग्नये जुष्टमभिघारयामि ॥ आग्नेयं पुरोडाशमभिघारयति ॥ तूष्णीमितरौ ॥ स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि ते ॥ पात्र्यामुपस्तीर्य ॥ आर्द्रः प्रथस्नुर्भुवनस्य गोपाः शृत उत्स्नाति जनिता मतीनां ॥ अपर्यावर्तयन्पुरोडाशमुद्वास्य ॥ वेदेन भस्म प्रमृज्य ॥ तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः ॥ ॥२८॥

पात्र्यां प्रतिष्ठापयति ॥ इडा भूतिः पृथिव्यै रसो मोत्क्रमीत् ॥ स्रुवेण घृतमानीय प्रत्यज्य ॥ देवस्त्वा सविता मध्वानक्तु ॥ स्रुवेण पुरोडाशमनक्ति ॥ उपरिष्टादभ्यज्याधस्तादुत्तानोपानक्ति ॥ यजमानः ॥ तेजोऽसि गायत्रं छंदस्तर्पय मा तेजसा ब्रह्मवर्चसेन ॥ त्विषिरसि त्रैष्टुभं छंदस्तर्पय मौजसा वीर्येण ॥ तुष्टिरसि जागतं छंदस्तर्पय मा प्रजया पशुभिः ॥ प्रतिपुरोडाशमन्यमानं ॥ अध्वर्युः ॥ चतुर्होता पौर्णमास्यां हविꣳष्यासादयति ॥ पंचहोत्रामावास्यायां ॥ पृथिवी होता ॥ द्यौरध्वर्युः ॥ रुद्रोऽग्नीत् ॥ बृहस्पतिरुपवक्ता ॥ इति चतुर्होता पौर्णमास्यां ॥ अग्निर्होता ॥ अश्विनाध्वर्यू ॥ त्वष्टाग्नीत् ॥ मित्र उपवक्ता ॥ इति पंचहोत्रामावास्यायां ॥

द०
॥२९॥

प्रियेण नाम्ना प्रियꣳ सद आसीद ॥ विधृतौ ॥ अपरेण स्रुचः पुरोडाशमासादयति ॥ यजमा
नः ॥ यज्ञोऽसि सर्वतः श्रितः सर्वतो मा भूतं भविष्यच्छ्रयताꣳ शतं मे सन्त्वाशिषः सहस्रं मे सन्तु
सूनृता इरावतीः पशुमतीः प्रजापतिरसि सर्वतः श्रितः सर्वतो मा भूतं • पशुमतीः ॥ आग्ने
यं पुरोडाशमासन्नमभिमृशति ॥ अयं यज्ञः स■मसदद्धविष्मानृचा साम्ना यजुषा देव
ताभिः ॥ तेन लोकान्सूर्यवतो जयेमेन्द्रस्य सख्यममृतत्वमश्याम् ॥ सर्वाणि हवीꣳषि त्रिः
पर्यग्निं कृत्वा ॥ यो नः कनीय इह कामयाता अस्मिन्यज्ञे यजमानाय मह्यम् ॥ अप तमिन्द्रो वै
मृधो भुवनान्नुदतामहं प्रजां वीरवतीं विदेय ॥ ऐन्द्रं वै मृधं ॥ दर्शेनु ॥ अप तमिन्द्राग्नी भुवनां ॥२९॥

पौ०

न्नुदेतामिन्द्राग्नी ॥ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तनुवं पुषेम ॥ मह्यं नमन्तां प्रदि
शश्चतस्रः त्वयाध्यक्षेण पृतना जयेम ॥ मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुर
ग्निः ॥ ममान्तरिक्षमुरुगोपमस्तु मह्यं वातः पवतां कामे अस्मिन् ॥ मयि देवा द्रविणमायजन्तां
मय्याशीरस्तु मयि देवहूतिः ॥ दैव्या होतारा वनिषंत पूर्वेऽरिष्टाः स्याम तनुवा सुवीराः ॥
मह्यं यजन्तु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु ॥ एनो मा निगां कतमच्चनाहं विश्वे
देवासो अधि वोचता मे ॥ देवीः षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयध्वम् ॥ मा हास्म
हि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥ अग्निर्मन्युं प्रतिनुदन्पुरस्तादद्ब्धो गोपाः

यस्य

परिपाहि नस्त्वं॥ अस्मे चो यं स्तु नि गुत: पुनस्त्वे मघोंचित्तं प्रभुधा विनेशात्॥ धाताधाता नोभुव
नस्य [illegible] निर्देवं सवितारमभिमा जिषाहे॥ इमं यज्ञमभिनो भाबृहस्पतिर्देवाञ्योतु यजमा
नेन्यर्थान्॥ उरुव्यचानो महिषं: शर्मयं सदस्मिन्हवे पुरहूत: पुरुक्षु॥ सन: प्रजायै हर्य
श्वमृडयेंद्र मानो रीरिषो मापरादा[illegible]॥ येन: सपत्ना अपते भवं त्विंद्राग्निभ्यामवबाधामहे
तान्॥ वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्॥ अर्वाचमिंद्रममुतो
हवामहे यो गोजिद्धनजिदश्वजिद्य:॥ इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा॥
पृथिवी होता द्यौरध्वर्यु: रुद्रोग्नीद्बृहस्पतिरुपवक्ता चतुर्होता पौर्णमास्यां॥ अग्निहोत्र० ॥३०॥

पंच होत्रा मावास्यायां॥ अध्वर्यु:॥ अयं वेद: पृथिवीमन्वविंदद्गुहासतीं गहने गव्हरेषु॥
सविंदतु यजमानाय लोकमच्छिद्रं यज्ञं भूरिकर्मा करोतु॥ अग्रेणोत्तरेण वाध्रुवां वेदं निधाय॥
वेद्यंतान्परिस्तरणशेषै: परिस्तीर्य होतृषदनं कल्प्य हुत्वा सामिधेनीभ्य: प्रतिपद्यते॥
होतरेवहि॥ अग्नये समिध्यमानायानुब्रूहि॥ प्रणवे प्रणवे समिधमादधाति॥ पुरस्ता
त्सामिधेनीनां दशहोतारं वदेत्॥ यजमान:॥ चित्तिस्स्रुक्॥ चित्तमाज्यं॥ वाग्वेदि:॥ आधीतं
बर्हि:॥ केतो अग्नि:॥ विज्ञातमग्नि:॥ वाचस्पतिर्होता॥ मन उपव[illegible]क्ता॥ प्राणो हवि:॥ सा
मोध्वर्यु:॥ अंगिरसो मास्य यज्ञस्य प्रातरनुवाकैरवंतु॥ सामिधेनीनां प्रतिपदिजपती॥

न्निस्रुक्॰ सामाध्वर्युः॥ अनूच्यमानासु दशहोतारं व्याख्याय। उच्छुष्मो अग्ने यजमाना
येधि निशुष्मो अभिदासते॥ अग्ने देवेद्ध मन्विद्ध मंद्र जिह्वामर्त्यस्य ते होतर्मूर्द्धन्ना
जिघर्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥ समिध्यमानमनुमंत्रयते॥ समिद्धो अ
ग्निराहुतः स्वाहाकृतः पिपर्तु नः॥ स्वगा देवेभ्य इदं नमः॥ समिद्धं॥ देवाः पितरः पित
रो देवा योहमस्मि स सन्यजे॥ यस्यास्मि न तमंतरेमि स्वं म इष्टं स्वं दत्तं स्वं पूर्तं
स्वं श्रांतं स्वं हुतं॥ तस्य मेग्निरुपद्रष्टा वायुरुपश्रोतादित्योनुख्याता द्यौः पिता
पृथिवी माता प्रजापतिर्बंधुर्य एवास्मि स सन्यजे॥ होतृप्रवरेध्वर्युः प्रवरे च प्रव्रीयमाणे॥ ॥ ३१॥

अध्वर्युः॥ समिद्धो अग्न आहुतेत्यभिज्ञाय एकामनूयाजसमिधमवशिष्य इध्मशेषम
भ्यादधाति परिधानीयायां वा॥ वेदेनाग्निं त्रिरुपवाज्य॥ स्रुवेण ध्रुवाया आज्यमादाय वे
देनोपयम्यासीन उत्तरं परिधिसंधिमन्ववहृत्य प्रजापतये स्वाहा॥ यजमानः॥ मनोसि प्रा
जापत्यं मनसा मा भूतेनाविश॥ स्रुचमाधार्यमाणमनुमंत्रयते॥ प्रजापतय इदं॰॥ अध्वर्युः॥
आप्यायतां ध्रुवा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः॥ सूर्याया ऊधो दित्या उपस्थ उरुधारा
पृथिवी यज्ञे अस्मिन्॥ स्रुवेणाज्यस्थाल्या आज्यमादाय ध्रुवामाप्याययतीति सार्वत्रिकं॥
अग्नीत्परिधींश्चाग्निं च त्रिस्त्रिः संमृड्ढि॥ इति संप्रेष्यति॥ इध्मसंनहनैः सह स्फ्येयत्रैते

द०
॥३२॥

स्थेयं वाग्नीध्रः परिधीन् यथा परिधि तमन्वग्रं त्रिस्त्रिः संमृज्यात् ॥ अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं
वाजं जेष्यन्तं वाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्नादमन्नाद्याय ॥ त्रिरग्निं प्राञ्चं॥
अध्वर्युः ॥ भुवनमसि विप्रथस्वाग्ने यष्टरिदं नमः ॥ अग्रेण ध्रुवां जुहूं वाजिनिं धृत्वा ॥ जुह्वेहि
अग्निस्त्वा ह्वयति देवयज्यायै ॥ जुहूमादत्ते ॥ उपभृदेहि देवस्त्वा सविता ह्वयति देवयज्यायै ॥ उप
भृतं ॥ सुयमे मे अद्य घृताची भूयास्तं स्वावृतौ सूपावृतौ ॥ उपभृति जुहूं सादधासशब्दं
कुर्वन्मुखतोभिहृत्य मुखतो पावहरति सर्वत्रैवमसादधानो पावहरणे भवतः ॥ न च संस्पृशंञ्च य
जिनाभिदेशे स्रुचौ धारयति ॥ अग्नाविष्णू मा वामवक्रमिषं विजिहाथां मा मा संताप्तं लोकं ॥३२॥

पौ०

मे लोककृतौ स्थ लोकं कृणुतं ॥ अग्रेण स्रुचौ परेण मध्यमं ॥ परिधिमन्ववक्राम न्नन्तरं दक्षिणेन पदा द
क्षिणाति क्रामत्युदङ् सव्येन दक्षिणाति क्रामति ॥ विष्णोः स्थानमसीत इन्द्रो अकृणोद्वीर्याणि ॥
अवतिष्ठते न वेदिं दक्षिणः पादो भवत्सः वध्रः सव्योधोर्ध्वस्तिष्ठन् स्रुचि सधमाज्यं स्पृशति यज
माने ॥ समारभ्योर्ध्वो अध्वरो दिविस्पृशमह्रुतो यज्ञो यज्ञपतेरिन्द्रावान्स्वाहा ॥ स्रुचमाधारयति॥
यजमानः ॥ वामस्यैन्द्रीं सपत्नक्षयणीं तया वामैन्द्रियेणाविशत ॥ इन्द्रायेदं ॥ अध्वर्युः ॥ हविर्वहन्दाः ॥
स्रुचमुद्यम्य ॥ पाहि माग्ने दुश्चरितादा मा सुचरिते भज ॥ असंस्पर्शयन् स्रुचौ प्रत्याक्रामति सते
एवाक्रमण प्रत्याक्रमणे मंत्रवती भवतः ॥ मखस्य शिरोसीति संज्योतिषा ज्योतिरङ्क्तां ॥ जुह्वा ध्रुवां

द्विस्त्रिर्वा सिमनक्ति ॥ उभौतरं रासः ॥ स्रुवेण ध्रुवाया आज्यमादाय ॥ स्रुवेण ध्रुवाया आज्यमादा
य ॥ स्रुचीरायस्याहा ॥ जुहूमभिघार्य ॥ जुह्वोपादाय ॥ यज्ञेन यज्ञः संततः ॥ ध्रुवां प्रत्यभिघार्य ॥
आयतने स्रुचौ सादयित्वा ॥ इध्मसंनहनानि स्रुक्ष्य उपसंगृह्य ॥ वेदाग्रं तृणमग्न्यंतमादायोत्त
रतः प्रवरायावतिष्ठते पूर्वोध्वर्युरपर आग्नीध्रः ॥ क इदमध्वर्युर्भविष्यति स इदमध्वर्युर्भवि
ष्यति यज्ञो यज्ञस्य वागार्त्विज्यं करोतु मनार्त्विज्यं करोतु वाचं प्रपद्ये भूर्भुवस्स्वश्चित्ता स्थाने तिष्ठा
मि ॥ आग्नीध्रः ॥ क इदमग्नीद्भविष्यति स इदमग्नीद्भविष्यति यज्ञो यज्ञस्य वागार्त्विज्य० तिष्ठामि ॥
ब्रह्मन् प्रवरायाश्रावयिष्यामि ॥ ब्रह्माणमामंत्र्य ॥ ब्रह्मा ॥ भूर्भुवः स्वर्बृहस्पतिः प्रसूतः ॥ ओं मा ॥३३॥

श्रावय ॥ अध्वर्युः ॥ आश्रावय ॥ आग्नीध्रः ॥ अस्तु श्रौषट् ॥ अग्निर्देवो होता देवान्यक्षद्विद्वा
ंश्चिकित्वन्मनुष्वद्गौतमदायास्यवदंगिरोवद्ब्रह्मण्वदाचक्षवद्ब्राह्मणास्य यज्ञस्य प्रावितारः ॥
नारायणशर्मा उपांशु होतृनाम गृहीत्वामानुषद्र स्रुचौ वैयाघ्रसंतृणमुत्सृजति ॥ यजमानः ॥
देवाः पितरः पितरो देवाः ॥ अध्वर्युः ॥ घृतवती शब्दे जुहूपभृतावादाय ॥ दक्षिणा सव्यदतिक्रां
तोग्रेणाघारसंभेदं पंच प्रयाजानाश्राव्यो यजति प्रतिदिशं सर्वान्वैकध्यं ॥ यजमानः ॥ चतुर्होता
रं यदेतु रस्ता प्रयाजानां ॥ अध्वर्युः ॥ आश्राव्य प्रत्याश्राविते समिधो यजेति प्रथमं संप्रेष्य
ति ये यजामहे तीतरान् ॥ यजमानः ॥ समिद्भ्यो ग्नयइ० ॥ वसंतमृतूनां प्रीणामि स मा प्रीतः प्रीणातु ॥

एकोममैकातस्ययोस्मान्द्वेष्टियंचवयंद्विष्मः॥ तनूनपातेग्नयइ०॥ ग्रीष्मऋतूनांप्रीणामिस
माप्रीतःप्रीणातु॥ द्वौममद्वौतस्ययोस्मा०॥ इडोग्नयइ०॥ वर्षाऋतूनांप्रीणामितामाप्री
ताःप्रीणंतु॥ त्रयोममत्रयस्तस्ययोस्मा०॥ त्रीणिपूर्वार्धमौपभृतंजुह्वामानीय॥ बर्हिषो
ग्नयइ०॥ शरदमृतूनांप्रीणामिसामाप्रीताप्रीणातु॥ चत्वारोममचत्वारस्तस्ययोस्मा०॥
स्वाहाकारायाग्नयइ०॥ हेमंतशिशिरावृतूनांप्रीणामितौमाप्रीतौप्रीणीतां॥ पंचममनतस्य
किंचनयोस्मा०॥ प्रत्याक्रम्य॥ शेषेणध्रुवामभिघार्य॥ अनुपूर्वंहवींष्यभिघारयति॥
उपभृतमंततः॥ आयतनेस्रुचौसादयित्वा॥ आप्यायतांचत्वारि॥ स्रुवेणप्रस्तरबर्हिःसमंजनं॥ ॥२४॥

अग्नयेनुब्रूहि॥ अग्निंयज॥ अग्नयइ०॥ पूर्ववदाप्यायतांचत्वारि॥ सोमायानुब्रूहि॥
सोमंयज॥ सोमायेदं०॥ अग्नीषोमयोरहंदेवयज्ययाचक्षुष्मान्भूयासं॥ अन्वाधानेष्टिम
ध्येव्रतोहनिव्रतलोपप्रायश्चित्तार्थंव्रतपतेष्टिस्थानेपूर्णाहुतिंहोष्यामि॥ अग्नयेव्रतपत
येस्वाहा॥ अग्नयेव्रतपतयइ०॥ सर्वप्रायश्चित्तंकरिष्ये॥ भूर्भुवःसुवःस्वाहा॥ प्रजापतय
इ०॥ यजमानः॥ पंचहोतारंवदेत्पुरस्तात्प्रयाजानां॥ अग्निर्होता०॥ अध्वर्युः॥ आप्यायतां
जुह्वामुपस्तीर्य॥ माभेर्मासंविक्थामात्वाहिंसिषंमातेतेजोपक्रमीद्भरतमुद्धरेमनुषिंचावदा
नानितेप्रत्यवदास्यामिनमस्तेअस्तुमामाहिंसीः॥ आग्नेयस्यपुरोडाशस्यमध्यादंगुष्ठ-

द०

पौ०

॥३५॥

परिमाभमवदामंनिरस्थीनमवद्यनि॥ पृथ्विधिर्तृतीयमनूच्चीनं॥ पश्चाधर्तितीयं पश्चाद्वतिनः॥
आप्यायतांअभिघार्य॥ यदस्यदानानितेवप्यन्वियोमाचार्षमात्मनः॥ आज्येन प्रत्येन प्रयेनतन्न
आप्यायतांपुनः॥ हविः प्रत्यभिघारयति॥ स्रुक्स्रुखं॥ अग्नयेनुब्रूहि॥ अग्निंयज॥ अग्न
यइदं॥ अग्नेरहंदेवयज्ययाअन्नादोभूयासं॥ आप्यायतांचत्वारि॥ उपांशु॥ विष्णवेअनुब्रूहि॥
विष्णुंयज॥ विष्णवइदं॥ दब्धिरस्यदब्धोभूयासं यापामंदभेयं॥ आप्यायतांमाभेराप्यायतां
यदस्यदानानि॥ अग्नीषोमाभ्यामनुब्रूहि॥ अग्नीषोमौयज॥ अग्नीषोमाभ्यामिदं॥ अग्नी
षोमयोरहंदेवयज्ययावृत्रहाभूयासं॥ आप्यायतांमाभेराप्यायतांयदस्यदानानि॥ इंद्रायवै

॥३५॥

स्याहं

मृधायानुब्रूहि॥ इंद्रंवैमृधंयज॥ इंद्रायवैमृधायेदं॥ इंद्रस्यवैमृधदेवयज्ययासपत्नोवी
यवीभूयासं॥ इतिपौर्णमास्यां॥ दर्शे॥ उपांशुयागोनपूर्ववत्॥ आप्यायतांमाभेराप्यायतां
यदस्यदानानि॥ इंद्राग्निभ्यामनुब्रूहि॥ इंद्राग्नींयज॥ इंद्राग्निभ्यामिदं॥ इंद्राग्न्योरहंदेवय
ज्ययेंद्रियाव्यन्नादोभूयासं॥ प्रसाक्रम्य॥ स्रुवेणपार्वणहोमौ॥ ऋषभंवाजिनंवयंपूर्णमासंय
जामहे॥ सनोदोहतांसुवीर्यंरायस्पोषंसहस्रिणं प्राणायसुराधसेपूर्णमासायस्वाहा॥
पूर्णमासायेदं॥ अमावास्यासुभगासुसेवायेनुरिचभूयआप्यायमाना॥ सानोदोहतांसु
वीर्यंरायस्पोषंसहस्रिणंमपानायसुराधसेमावास्यायैस्वाहा॥ अमावास्यायाइदं॥

तूष्णीं जुहुयात् षट्‌सप्त वा गृहीत्वा॥ नारिष्टहोमाञ्जुहोति॥ दशाते तनुवौ यज्ञस्य शिमास्ता:
श्रीणन्नुयजमानो घृतेन॥ नारिष्टयो: प्रशिषमीडमानो देवानां दैव्येपि यजमानोमृतोभूत् स्वाहा॥
यजमानः॥ नारिष्टाभ्यामग्निवायुभ्यामिदं०॥ यं वो देवा अकल्पयं भूर्जो भागं शान्तं तु॥ एत
द्वोतेन श्रीणानितेन तृप्यत मंहहो स्वाहा॥ नारिष्टाभ्याम०॥ अहं देवानां सुकृतामस्मि
लोके ममेदमिष्टं न मिथुर्भवाति॥ अहं नारिष्टावनुयजामि विद्वान्यदाभ्यामिन्द्रो अदधाद्भा
गधेयं स्वाहा०॥ नारिष्टाभ्या०॥ अदारसृद्भवतु देव सोमास्मिन्यज्ञे मरुतो मृडतानः॥ मा
नो विददभिभामो अशस्तिर्मानो विददृजना द्वेष्या या स्वाहा॥ नारिष्टेभ्यो देव सोम मरु

द्भ्य इदं०॥ ब्रह्म प्रतिष्ठा मनसो ब्रह्म वाचो ब्रह्म यज्ञानां हविषामाज्यस्य॥ अतिरिक्तं क
र्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन् स्वाहा कृताहुतिरेतु देवान् स्वाहा॥ नारिष्टा
य ब्रह्मण इदं०॥ सं ते मनसा मनः सं प्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवत् स्वाहा॥ नारिष्टेभ्यो
देवेभ्य इदं०॥ सं प्राणे प्राणं दधामि ते सं व्याने समपानं दधामि ते॥ परिगृह्य यजमानो मृतोभू
त्वं न एधि द्विपदे शं चतुष्पदे स्वाहा॥ नारिष्टाय परमात्मन इदं०॥ एषु उपहोमानां कालेनंतरं
प्रधाना त्याग्या समिष्टयजुषः॥ आप्यायतां ध्रुवामुपस्तीर्य॥ सर्वेषां हविषामुत्तराधात्
सकृत्सकृत्तत् त्रस्विष्टकृतेवद्यति द्विः पंचावत्तिनः॥ आप्यायतां ध्रुवाभिघार्य॥

नरविः प्रत्यभिघारयति ।। अग्नये स्विष्टकृतेनुब्रूहि ।। अग्निꣳ स्विष्टकृतं यज ।। अग्न
ये स्विष्टकृत इदं० ।। अग्ने स्विष्टकृतोहं देवयज्यया आयुष्मान्यज्ञेन प्रतिष्ठां गमेयं ।। प्रत्या
क्रम्य जुह्वामुपआनीय ।। वैश्वानरे हविरिदं जुहोमि साहस्रमुत्सꣳ शतधारमेतं ।। सनः
पितरं पितामहं प्रपितामहꣳ स्वर्गेलोके पिन्वमानो बिभर्तु स्वाहा ।। अग्नये वैश्वानरा
येदं० ।। अंतःपरिधिनिनयति निनयति ।। इति दर्शपूर्णमासद्वितीयप्रश्नः समाप्तः ।।
इडामेके पूर्वꣳ समामनंति प्राशित्रमेके प्राशित्रपात्र उपस्तीर्य ।। आग्नेयं पुरोडाशं
प्राचे तिर्यंचयावविरुन्य ।। अपउपस्तृणय ।। अन्वायोयवमात्रादायाधातृ सतामिदं ।। ।।३८।।

मारूरूपामयज्ञस्य भुह्यꣳ स्विष्टमिदꣳ हविः ।। अंगुष्ठेनोपमध्यमया चांगुल्या सर्वेभ्यः
पुरोडाशेभ्यो यवमात्रं पिप्पलमात्रं वावद्यति ।। यजमानः ।। अग्निर्मा दुरिष्टात्पातु सवि
ताघशꣳसात् योमेंति दूरे रातीयति तमेतेनजेषं ।। प्राशित्रमवदीयमानमनुमंत्रयते ।।
अध्वर्युः ।। पूर्वेणाहवनीयं परीत्य ।। प्राशित्रं ब्रह्मणे परिहरति ।। ब्रह्मा ।। मित्रस्यत्वा चक्षु
षा प्रतीक्षे ।। प्राशित्रमाह्रीयमाणमीक्षते ।। देवस्यत्वा० भ्यां प्रतिगृह्णामि ।। तदंजलिना
प्रतिगृह्य ।। पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे ।। इति कुशेषु प्राग्दंडं निधा
य ।। अंगुष्ठोपकनिष्ठिकाभ्यामादाय ।। अग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन ।। असं

द० पौ०

॥३८॥

स्यादं प्राश्नीयात्॥ आचम्य॥ सलोनत्वाभिजिघर्मि॥ या अप्स्वंतर्देवतास्ताइदं शमयंतु॥ चक्षुश्श्रोत्रंप्राणान्मे माहिंसीः॥ अन्वाचामेत्॥ इंद्रस्यत्वाजठरे दधामि॥ नाभिदेशमालभेत्॥ प्रक्षाल्य प्राशित्रहरणं॥ त्रिरभ्यात्म मपो निनयेत्॥ अध्वर्युः॥ इडायाम् उपस्तीर्य॥ मनुनादृष्टां घृतपदीं मित्रावरुण समीरितां॥ दक्षिणार्धादसंभिंदन्नवद्यामेवतो मुख्यं॥ हविर्भ्यो दक्षिणार्धात्प्रथममवदानमवद्यति॥ संभेदाद्वितीयं॥ पूर्वार्धाद्यजमानभागं॥ पश्चार्धात्तृतीयं पंचावत्तिनः॥ अनुमिब होर्ध्वं निमार्ज्येन संनयं ध्रुवायाउपोहति॥ यजमानः॥ सुरूपवर्षवर्णएहीमाभद्रांदुर्याँ अभ्येहि मामनुव्रता ॥३८॥

न्यु शीर्षाणि मृड्ढ्मिडएह्यदितएहि सरस्वत्येहि रंतिरसि रमतिरसि सूनर्यसि जुष्टे जुष्टिं तेशीयोपहूत उपहवं तेशीय॥ इडामवदीयमाननुमंत्रयते॥ अध्वर्युः॥ अभिघार्येडां होत्रे प्रदायापिवा प्राचीमिडामुपोह्य॥ दक्षिणत आसीनः स्रुवेण होतुरंगुलिपर्वणी अनक्ति॥ अपरमङ्गुलिपूर्वमेतद्वाविपरीतं॥ लेपादुपस्तरणाभिघारणे भवतः॥ उपहूयमानामन्वारभेते ध्वर्युर्यजमानश्च सप्रदेवगव्य इमे मंत्राः॥ यजमानः॥ भूयस्येहि॥ श्रेयस्येहि॥ वसीयस्येहि॥ चित्तएहि॥ दधिषएहि॥ इडएहि॥ सूनृतएहि॥ उभ्यैरपहवे सप्तमनुष्यगव्य इमे मंत्राः॥ चिदसि॥ मनासि॥ धीरसि॥ रंतिः॥ रमतिः॥ सूनुः॥ —

सूनरी॥ देवीर्द्वैरभिमानिवर्त्तध्वंᳪ स्योनाः स्योनेन घृतेन मा समुक्षत॥ नमइदमुपदंभि
षग्गषिर्ब्रह्मायद्धदेसमुद्रादुदचन्नि यस्त्रुचावाग्ग्रेचिमस्यतिष्ठति शृंगेभिर्दशभिर्दिशन्॥
वायचिद्वांतमाता॥ वायो पुरुहूतः पशुमान्सानि॥ होतारमीक्षमाणो वायुं मनसाध्याये
त्॥ सामेसत्या शीरस्य यज्ञस्य भूयादरेउता मनसातच्चक्षुमं यज्ञोदेवᳪ रोहतु यज्ञो
दिवंगच्छतु योदेवयानः पंथास्तेन यज्ञोदेवाᳪ अप्येत्वस्मासु इंद्र इंद्रियं दधात्वस्मा
न्रायउत यज्ञाः सचंतामस्मासु संत्वाशिषः सानः प्रिया सुप्रतूर्तिर्मघोनीजुष्टिरसिजुष
स्वनोजुष्टानोसि जुष्टिंतेगमेयं॥ आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणंᳪ सव

चैसं॥ संजयन्क्षेत्राणि सहसाहमिंद्र कृण्वानो अन्यांᳪ अधरान् सपत्नान्॥ इडायाअर्ह
दैवयज्यया ● पशुमान्भूयासं॥ इडाधेनुः सहवत्सा न आगादूर्जं दुहाना पयसा प्रपीना॥
सा नो अन्नेन हविषोत गोभिरिडाभ्यस्माᳪ आगात्॥ भक्षायाः प्रियमाणे॥ इडेभागं जुष
स्वनो जिन्वगा जिन्वार्वतः॥ तस्यास्ते भक्षिवाण स्याम सर्वात्मानः सर्वगणाः॥ यजमानः॥
पंचमाइडा प्राश्याचम्य॥ मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञंᳪ समिमं दधातु॥ बृह
स्पतिस्तनुतामिमन्नो विश्वेदेवा इह मादयंतां॥ अंतर्वेदि प्रस्तरे द्भिर्मार्जयंते॥ अध्वर्युः॥
आग्नेयं पुरोडाशं चतुर्धा कृत्वा बर्हिषदं करोति॥ यजमानः॥ ब्रध्नपिन्वस्व ददतो मे माक्षा

द० ॥४०॥ यो०

यि कुर्वतो मे मोपदसद्दिशां कॢप्तिरसि दिशो मे कल्पन्तां कल्पन्तां मे दिशो दैवीश्च मानुषी
श्चाहोरात्रे मे कल्पेतामर्धमासा मे कल्पन्तां मासा मे कल्पन्तामृतवो मे कल्पन्ताꣳ संवत्सरो मे
कल्पतां कॢप्तिरसि कल्पतां मे ॥ बर्हिषि पुरोडाशमासन्नमभिमृशति ॥ आशानां त्वा
शापालेभ्यश्चतुर्भ्यो अमृतेभ्यः ॥ इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयं ॥ ब्रध्न
पाहि भजतां भागी भागं माभागो भक्त निरभागं भजामः ॥ अपस्पिन्वोषधीर्जिन्व द्विपा
त्पाहि चतुष्पादव दिवो वृष्टिमेरय ॥ ब्राह्मणानामिदꣳ हविः सोम्यानाꣳ सोमपीथि
नां ॥ निर्भक्तो ब्राह्मणो नेह ब्राह्मणस्यास्ति ॥ नेद्यजमानो व्यादिशति ॥ इदं ब्रह्मणः ॥ ॥४०॥

इदꣳ होतुः ॥ इदमध्वर्योः ॥ इदमग्नीधः ॥ उपहूतो द्यौः पितोप मां द्यौः पिता ह्वयताम
ग्निराग्नीध्रादायुषे वर्चसे जीवातवे पुण्यायोपहूता पृथिवी मातोप मां माता पृथिवी ह्वय
तामग्निराग्नीध्रादायुषे वर्चसे जीवातवे पुण्याय ॥ इदमग्नीधः ॥ इदं यजमानस्य ॥ आ
ग्नीध्रभागस्य वै श्रेष्ठं ॥ अध्वर्युर्यजमानभागं निर्दिशति ॥ स्थविष्ठमग्नीधे षडवत्त
मꣳ संपादयति ॥ द्विरुपस्तृणाति ॥ द्विराधत्ते ॥ द्विरभिघारयति ॥ अग्नेराग्नीध्रम
स्यग्नेः शर्मा मित्रमसि नमस्ते अस्तु मा मा हिꣳसीः ॥ आग्नीध्रो भक्षयति ॥ वेदेन ब्रह्म
यजमानभागं परिहरति ॥ पृथिव्यै भागोऽसि ॥ होतृभागं भक्षयति ॥ अन्तरिक्षस्य भा
^ पृथक्पात्राभ्यामितरयोः ॥ स्रुवेण होतुः ॥ जुह्वा अध्वर्योः ॥

॥६०
॥७७॥

मौ०

गोसि ॥ अध्वर्युर्भक्षयति । दक्षिणाग्नावन्वाहार्यमरांतमपरिमितमोदनं पचति । क्षीरे भृ
यती घृतं ॥ तमभिघार्यमभिघार्योद्वास्यान्वेद्यासाद्य ॥ ब्रह्मा ॥ अन्वाहार्यमवेक्षते ॥ प्र
जापतेर्भागोस्यूर्जस्वान्पयस्वानक्षितिरसि मा मे क्षेष्ठाः ॥ अस्मिंल्लोके मुष्मिंश्च प्राणापानौ
मे पाहि कामाय त्वा ॥ इत्य स्पृशन्नेव प्राश्यांगुष्ठकनिष्ठिकाभ्यां शिष्टं गृहीत्वा ब्रह्मभागे निद
ध्यात् ॥ यजमानः ॥ ब्रह्म पिन्वस्व ददतो मे माक्षायि कुर्वतो मे मोपदसत् ॥ प्रजापतेर्भागोस्यू
र्जस्वान्पयस्वान्प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यौ मे पाह्यक्षि[illegible]तोस्यक्षि
त्यै त्वा मा मे क्षेष्ठा[illegible] अमुत्रामुष्मिंल्लोके ॥ इयं स्थाल्यमृतस्य पूर्णा सहस्रधारा उत्सो अक्षी

नो
॥७७॥

यमानः ॥ सदाधार पृथिवीमन्तरिक्षं दिवं चैते नौदनेनाति नराणि मृत्युं ॥ दक्षिण सभ्युप
